## केन्द्रीय विद्यालय संगठन
## Kendriya Vidyalaya Sangathan



# संस्कृत (कोड सं. ११९)
# Sanskrit (Code No. 119)

कक्षा/Class: IX

2024-25

### विद्यार्थी अध्ययन सामग्री
### Student Support Material

# संदेश

विद्यालयी शिक्षा में शैक्षिक उत्कृष्टता प्राप्त करना केन्द्रीय विद्यालय संगठन की सर्वोच्च वरीयता है। हमारे विद्यार्थी, शिक्षक एवं शैक्षिक नेतृत्वकर्ता निरंतर उन्नति हेतु प्रयासरत रहते हैं। राष्ट्रीय शिक्षा नीति 2020 के संदर्भ में योग्यता आधारित अधिगम एवं मूल्यांकन संबन्धित उद्देश्यों को प्राप्त करना तथा सीबीएसई के दिशा निर्देशों का पालन, वर्तमान में इस प्रयास को और भी चुनौतीपूर्ण बनाता है।

केन्द्रीय विद्यालय संगठन के पांचों **आंचलिक शिक्षा एवं प्रशिक्षण संस्थान** द्वारा संकलित यह 'विद्यार्थी सहायक सामाग्री' इसी दिशा में एक आवश्यक कदम है । यह सहायक सामग्री कक्षा 9 से 12 के विद्यार्थियों के लिए सभी महत्वपूर्ण विषयों पर तैयार की गयी है । केन्द्रीय विद्यालय संगठन की 'विद्यार्थी सहायक सामग्री' अपनी गुणवत्ता एवं परीक्षा संबंधी सामाग्री-संकलन की विशेषज्ञता के लिए जानी जाती है और अन्य शिक्षण संस्थान भी इसका उपयोग परीक्षा संबंधी पठन सामग्री की तरह करते रहे हैं । शुभ-आशा एवं विश्वास है कि यह सहायक सामग्री विद्यार्थियों की सहयोगी बनकर सतत मार्गदर्शन करते हुए उन्हें सफलता के लक्ष्य तक पहुंचाएगी ।

शुभाकांक्षा सहित ।

निधि पांडे
आयुक्त, केन्द्रीय विद्यालय संगठन

तत् त्वं पूषन् अपावृणु

केन्द्रीय विद्यालय संगठन

**प्रभारी एवं संयोजक:** श्री संजय, प्राचार्य, के.वि. जी.सी.सी.आर.पी.एफ. कादरपुर (गुरुग्राम संभाग)

**पुनरीक्षण:** के.वि.सं. शिक्षा एवं प्रशिक्षण का आंचलिक संस्थान चंडीगढ़

श्री रमाकांत आर्य, टी.जी.टी. (संस्कृत), के.वि. 3 बीआरडी चंडीगढ़ (चंडीगढ़ संभाग)

# विषयानुक्रमणिका


| क्र. सं. | विषयाः | पृष्ठसंख्या |
|---|---|---|
| 01. | पाठ्यक्रमः | 1-11 |
| 02. | अपठित – गद्यांशः/अनुच्छेदः | 12-18 |
| 03. | पत्र-लेखनम् | 19-33 |
| 04. | चित्रवर्णनम् / अनुच्छेदलेखनम् | 34-41 |
| 05. | कथापूर्तिः/ संवादपूर्तिः | 42-47 |
| 06. | उच्चारणस्थानम् | 48-50 |
| 07. | सन्धिः | 51-54 |
| 08. | कारक-उपपदविभक्त्यः | 55-59 |
| 09. | शब्दरुपाणि | 60-64 |
| 10. | धातुरुपाणि | 65-71 |
| 11. | प्रत्ययाः | 72-76 |
| 12. | अव्ययपदानि | 77-80 |
| 13. | संख्या (1-100) | 81-85 |
| 14. | गद्यांशः | 86-89 |
| 15. | पद्यांशः | 90-94 |
| 16. | नाट्यांशः | 95-99 |
| 17. | प्रश्न-निर्माणम् | 100-105 |
| 18. | श्लोक-अन्वयः अथवा भावार्थः | 106-107 |
| 19. | प्रसंङ्गानुसारम् अर्थचयनम् | 108-109 |
| 20. | पाठाधारित-कथापूर्तिः | 110-111 |
| 21. | आदर्श प्रश्नपत्रम्-1 | 112-117 |
| 22. | आदर्श प्रश्नपत्रम्-1 अंकयोजना | 118-120 |
| 23. | आदर्श प्रश्नपत्रम्-2 | 121-126 |

# कक्षा – नवमी

## संस्कृतम् (सम्प्रेषणात्मकम्) कोड् सङ्ख्या - 119

## पाठ्यक्रमः परीक्षानिर्देशाश्च (2024-25)

या अन्तस्स्थले विद्यमानान् विविधविचारान् भावान् विविधाः अनुभूतीः च सार्थकैः ध्वनिभिः लिखितैः सङ्केतैः च प्रकटयति व्यक्तीकरोति सा भाषा। वस्तुतः भाषा अभिप्रायप्रकटनस्यैव विशिष्टं साधनं वर्तते। समाजे जनानां परस्परं भावग्रहणाय, भावविनिमयाय भावावबोधनाय च भाषा एव सरलतमं स्पष्टतमं च साधनं विद्यते। संसारे द्विसहस्राधिकभाषाः अधुना जनैः प्रयुज्यन्ते यासु गीर्वाणभाषा देववाणी संस्कृतभाषा प्राचीनतमा समृद्धा चास्ति। अस्यामेव भाषायां चतुर्भिः वेदैः षड्वेदाङ्गैः च सुसम्पन्नाः चतुर्दशविद्याः, विज्ञानम्, आयुर्वेदः, गणितं योगशास्त्रादयश्च ग्रन्थाः सुनिबद्धाः विद्यन्ते । एतेन अनुमातुं शक्यते यत् संस्कृतं केवलं भावप्रकटीकरणस्य विचारविनिमयस्य च माध्यमः एव न अपितु एकं विशिष्टं जीवनदर्शनम् अपि विद्यते। इतिहासः प्रमाणमत्र यत् सृष्टेः आदितः अद्यावधिः यत् शिक्षणं ज्ञानविज्ञानं च अस्ति तत् सर्वं अस्यां भाषायामेव अतीव वैज्ञानिकविधिना सन्निहितम् अस्ति। मनसः गहनातिगहनभावानां विविधविचाराणां च स्पष्टतया प्रकटीकरणार्थं संस्कृतं विना अन्यत्र नैव विद्यते वैशिष्ट्यम्। भारतीयं सर्वस्वं विश्वस्य समग्रं तत्त्वं च अस्यां भाषायाम् अस्ति।

संस्कृतस्य भाषावैज्ञानिकत्त्वम् – ऐतिहासिक-वर्णनात्मक-तुलनात्मकाध्ययन-द्वारा भाषायाः प्रकृतेः विकासोत्पत्तेः संरचनायाः अध्ययनपूर्वकं सर्वेषां विषयाणां सैद्धान्तिकः निर्णयः भाषाविज्ञानेन क्रियते। भाषाविज्ञान-नामकशास्त्रे शब्दानाम् उत्पत्तिः, वाक्यानां संरचना इत्यादीनां विषयाणां विचारः क्रियते। भाषाविज्ञानस्य सम्बन्धः सर्वेषां मानवानां भाषाभिः सह अस्ति। एवं भाषाविज्ञाने ध्वनेः, ध्वनि-उच्चारणोपयोगिनां स्वरयन्त्रमुखजिह्वादि-अङ्गानां प्रकृति-प्रत्ययादीनां, संज्ञासर्वनाम-क्रिया-विशेषणादीनां नामाख्यात-उपसर्जननिपातानां पदपदार्थविषयकाणां विकारादीनां विकारमूलककारकाणाम् अन्येषां विविधविषयाणाञ्च अध्ययनं क्रियते। भाषाविज्ञाने संस्कृतभाषा-विषयक-वर्णोत्पत्ति-सिद्धान्तस्य अतीव वैज्ञानिकं निरूपणं कृतं वर्तते।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा प्राचीनतमा अस्ति। प्रायः सर्वासु भाषासु संस्कृतपरकशब्दाः उपलभ्यन्ते। संस्कृतभाषा भारतीयभाषाणां जननी इति कथ्यते। सर्वासु भारतीयभाषासु संस्कृतभाषा अन्तर्लीना अस्ति इति सर्वे अङ्गीकुर्वन्ति।

भारतदेशः बहुभाषी देशोऽस्ति। अस्मिन् देशे अनेकतायाम् एकतावर्धिनी भाषेयं सामाजिकसमरसतायै जीवनविकासाय च आवश्यकी वर्तते। संस्कृतस्य सांस्कृतिकं महत्त्वं वर्णयन्तः विद्वांसः कथयन्ति "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, संस्कृतिमूलं संस्कृतम्, साहित्यं संस्कृतिवाहकञ्च इति।" एषा संस्कृतिः न केवलं भारतस्य अपि तु विश्वस्य मुकुटायमाना अस्ति। उक्तं च-

सत्यमहिंसादिगुणैः श्रेष्ठा विश्वबन्धुत्वशिक्षिका।
विश्वशान्तिः सुखधात्री भारतीया हि संस्कृतिः॥

संस्कृतस्य व्यापकत्वं ज्ञायते अनेन पद्येन -

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते॥

एवं संस्कृतभाषा परिनिष्ठिता, दोषरहिता, सरला, गभीरा, यथार्था वैज्ञानिकी च भाषा अस्ति। सम्प्रति युगेऽस्मिन् प्रमुखैः उद्देश्यैः संस्कृतभाषा शिक्षणीया अस्ति।

**शिक्षणोद्देश्यानि –**

* वसुधैव-कुटुम्बकम् इति भावनाविकासः।

* भारतीयभाषाणां संरक्षणम्।
* संस्कृतभाषया सम्प्रेषणकौशलविकासः।
* परस्परं संस्कृतसम्भाषणेन भावविनिमयः।
* संस्कृत-भाषया एव संस्कृत-शिक्षणम्।
* श्रवण-भाषण-पठन-लेखनेति चतुर्णां भाषिक-कौशलानां विकासः।
* बौद्धिकविकासपुरस्सरम् आध्यात्मिकनैतिकज्ञानम्।
* मानसिकविकासानन्दानुभूतिः रसानुभूतिश्च।
* भारतीयसंस्कृतेः संरक्षणं ज्ञानवर्धनञ्च।
* आत्मानुशासनसंस्थापनम्।
* भाषाशिक्षणकौशलानि वर्धनाय नैपुण्यप्राप्तिः।
* संस्कृतसाहित्यस्य अध्ययनेन ज्ञानानन्दस्य अनुभूतिः।
* मानवजीवनस्य विकासपूर्वकं कल्याणम्।
* संस्कृतभाषया छात्राणां सर्वविधविकासः।

**शिक्षणप्रविधयः -**

* संस्कृतमाध्यमेन सम्भाषणविधिना शनैः शनैः संस्कृत-शिक्षणं सम्भविष्यति। गतिवर्धनाय संस्कृताध्यापकैः धैर्येण स्वकीयाध्यापन-कार्यक्रमाणां नियोजनम्। रुचिकरभाषाभ्यासेन भाषिकोपलब्धिः। भाषिकाभ्यासाय वार्तालाप-कथाश्रवण-वादविवाद-संवाद-वर्णनपरकप्रतियोगिताभिः भाषाशिक्षणं कारयितुं शक्यते।
* विभिन्नप्रामाणिकसंस्थानां कार्यक्रमाः साहित्यसामग्र्यश्च प्रयुज्य उत्तमशिक्षणं कर्तुं शक्यते।
* संस्कृतभाषया उपलब्ध-दृश्य-श्रव्य-सामग्री-माध्यमेन भाषाभ्यासः।
* विभिन्नपाठ्यसामग्रीद्वारा शिक्षकः स्वकीयं शिक्षणकार्यं रुचिकरं कर्तुं शक्नोति।
* भाषाशिक्षकः छात्रान् स्नेहपूर्वकम् (आत्मीयभावेन) पाठयेत्।
* अद्यतनपूर्वकं साहित्यकोश-शब्दकोश-सन्दर्भग्रन्थानां सहायतया छात्राणां तत्परतावर्धनम्।
* प्राचीनार्वाचीनयोर्मध्ये समन्वयस्थापनद्वारा नूतनशिक्षणविधिभिश्च संस्कृतशिक्षणम्।
* सङ्गणकमाध्यमेन अन्तर्जाले विद्यमानसामग्रीभिश्च संस्कृतशिक्षणम्।

**कौशलानि-**

* ज्ञानात्मक-अवबोधनात्मक-अनुप्रयोगात्मक-विश्लेषणात्मक-संश्लेषणात्मक-मूल्याङ्कनात्मक-लक्षिताधिगमनविशेषाः।
* **श्रवणकौशलम्** – भावाधिग्रहणाय ध्वन्यात्मकं भाषायाः प्रथमं कौशलम् इदम्। अस्य साधनानि- गुरुमुखम्, आकाशवाणी, दूरवाणी, परिवारसदस्याः, समाजः, कक्ष्याः, ध्वनिमुद्रणयन्त्रम्, दूरदर्शनम् इत्यादीनि।
* **भाषणकौशलम्**- भावाभिव्यक्तये ध्वन्यात्मकं भाषायाः इदं द्वितीयं कौशलम्। वाग्-रूपं भावप्रकटनम् एव भाषणम्, परिसरप्रभावेण आधारेण वा भाषणशक्तिः जायते।
* **पठनकौशलम्** – भावाधिग्रहणाय लिप्यात्मकं भाषायाः तृतीयं कौशलम् इदम्। (अर्थग्रहणपूर्वकं स्पष्टरूप-वाचनम् इत्यर्थः)
* **लेखनकौशलम्**- भावाभिव्यक्तये लिप्यात्मकं भाषायाः चतुर्थं कौशलम् इदम्। (ध्वनिरूपे विद्यमानं भाषांशं लिपिरूपे अवतारणं लेखनम् इति उच्यते)

# कक्षा – नवमी (2024-25)
## संस्कृतम् (सम्प्रेषणात्मकम्) कोड् सङ्ख्या - 119

आहत्य-अङ्काः - 80+20
आहत्य-कालांशाः – 200

वार्षिकमूल्याङ्कनाय निर्मिते प्रश्नपत्रे भागचतुष्टयं भविष्यति –

| | | |
|---|---|---|
| **'क' भागः अपठितावबोधनम्** | **10 अङ्काः** | **25 कालांशाः** |
| **'ख' भागः रचनात्मकार्यम्** | **15 अङ्काः** | **40 कालांशाः** |
| **'ग' भागः अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** | **55 कालांशाः** |
| **'घ' भागः पठितावबोधनम्** | **30 अङ्काः** | **80 कालांशाः** |

**भागानुसारं विषयाः अङ्कविभाजनञ्च** **80 अङ्काः**

| क्र. सं. | विषयाः | प्रश्नप्रकाराः | मूल्यभारः |
|---|---|---|---|
| | **'क' भागः अपठितावबोधनम् 10 अङ्काः** | | |
| 1. | एकः गद्यांशः (80-100 शब्दपरिमितः) | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मकः)<br>भाषिककार्यम् (बहुविकल्पात्मकाः) | 1×2=2<br>2×2=4<br>1×1=1<br>1×3=3 |
| | | **पूर्णभारः** | **10 अङ्काः** |
| | **'ख' भागः रचनात्मककार्यम् 15 अङ्काः** | | |
| 2. | औपचारिकम् अथवा अनौपचारिकं पत्रम्<br>(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णं पत्रं लेखनीयम्) | निबन्धात्मकः | ½×10=5 |
| 3. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | पूर्णवाक्यात्मकः | 1×5=5 |
| 4. | संवादपूर्तिः / कथापूर्तिः<br>(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णः संवादः / कथा लेखनीया) | निबन्धात्मकः | ½×10=5 |
| | | **पूर्णभारः** | **15 अङ्काः** |

| 'ग' भागः<br>अनुप्रयुक्तव्याकरणम् 15 अङ्काः | | | |
|---|---|---|---|
| 5. | उच्चारणस्थानम् | लघूत्तरात्मकाः | ½×4=2 |
| 6. | सन्धिः | लघूत्तरात्मकाः | 1×4=4 |
| 7. | कारक-उपपदविभक्तयः | बहुविकल्पात्मकाः | 1×4=4 |
| 8. | शब्दरूपाणि | बहुविकल्पात्मकाः | 1×4=4 |
| 9. | धातुरूपाणि | बहुविकल्पात्मकाः | 1×4=4 |
| 10. | प्रत्ययाः | बहुविकल्पात्मकाः | 1×3=3 |
| 11. | अव्ययानि | लघूत्तरात्मकाः | ½×4=2 |
| 12 | सङ्ख्या – 1-100<br>(1-4 केवलं प्रथमा-विभक्तौ) | लघूत्तरात्मकाः | ½×4=2 |
| | | **पूर्णभारः** | **25 अङ्काः** |
| 'घ' भागः<br>पठितावबोधनम् 15 अङ्काः | | | |
| 13. | गद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकः<br>लघूत्तरात्मकौ (भाषिककार्यम्) | ½×2=1<br>1×2=2<br>1×2=2 |
| 14. | पद्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकः<br>लघूत्तरात्मकौ (भाषिककार्यम्)) | ½×2=1<br>1×2=2<br>1×2=2 |
| 15. | नाट्यांशः | अति-लघूत्तरात्मकौ<br>पूर्णवाक्यात्मकः<br>लघूत्तरात्मकौ (भाषिककार्यम्) | ½×2=1<br>1×2=2<br>1×2=2 |
| 16. | प्रश्ननिर्माणम् | पूर्णवाक्यात्मकाः | 1×5=5 |
| 17. | अन्वयः अथवा भावार्थः (रिक्तस्थानपूर्तिमाध्यमेन) | निबन्धात्मकः | ½×4=2 |
| 18. | प्रसङ्गानुसारम् अर्थचयनं कृत्वा लेखनम् | बहुविकल्पात्मकाः | 1×4=4 |
| 19. | पाठाधारित-कथापूर्तिः<br>(मञ्जूषापदसहायतया रिक्तस्थानपूर्तिः) | निबन्धात्मकः | ½×8=4 |
| | | **पूर्णभारः** | **30 अङ्काः** |
| | | **सम्पूर्णभारः** | **80 अङ्काः** |

# प्रश्नपत्र-प्रारूपम् /संरचना

## कक्षा – नवमी (2024-25)

## संस्कृतम् (सम्प्रेषणात्मकम्) कोड् सङ्ख्या - 119

| प्रश्नप्रकारः | प्रश्नानां सङ्ख्या | विभाग-सङ्ख्या | प्रतिप्रश्नम् अङ्कभारः | आहत्याङ्काः |
|---|---|---|---|---|
| **बहुविकल्पात्मकाः 1 अङ्कः** | 3+4+4+4+3+4=22 | 6 | 1 | 22 |
| **अति-लघूत्तरात्मकाः ½ अङ्कः** | 2+2+2=6 | 3 | ½ | 3 |
| **अति-लघूत्तरात्मकाः 1 अङ्कः** | 2=2 | 1 | 1 | 2 |
| **निबन्धात्मकः ½ अङ्कः** (रिक्तस्थानपूर्तिमाध्यमेन) | 10+10+4+8 =32 | 4 | ½ | 16 |
| **दीर्घोत्तरात्मकाः 1 अङ्कः** | 5+2+2+2+5=16 | 5 | 1 | 16 |
| **दीर्घोत्तरात्मकाः 2 अङ्कौ** | 2=2 | 1 | 2 | 4 |
| **लघूत्तरात्मकाः ½ अङ्कः** | 4+4+4=12 | 3 | ½ | 6 |
| **लघूत्तरात्मकाः 1 अङ्कः** | 2+2+2+1+4=11 | 5 | 1 | 11 |
| | | | **आहत्याङ्काः** | **80** |

# संस्कृतपाठ्यक्रमः (सम्प्रेषणात्मकम्) कोड् सङ्ख्या - 119

## कक्षा-नवमी (2024-25)

## वार्षिकं मूल्याङ्कनम्

| | |
|---|---|
| **'क' भागः**<br>**अपठितावबोधनम्** | **(10 अङ्काः)** |
| 1. एकः अपठितः गद्यांशः<br>80-100 शब्दपरिमितः गद्यांशः, सरलकथा<br>➢ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)<br>➢ शीर्षकलेखनम् (1)<br>➢ अनुच्छेद – आधारितं भाषिकं कार्यम् (3)<br>भाषिककार्याय तत्त्वानि -<br>✓ वाक्ये कर्तृ – क्रिया पदचयनम्<br>✓ विशेषण – विशेष्य चयनम्<br>✓ पर्याय – विलोमपद – चयनम् | 10 |
| **'ख' भागः**<br>**रचनात्मककार्यम्** | **(15 अङ्काः)** |
| 2. सङ्केताधारितम् औपचारिकम् अथवा अनौपचारिकं पत्रलेखनम्<br>(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णं पत्रं लेखनीयम्) | 5 |
| 3. चित्राधारितं वर्णनम् अथवा अनुच्छेदलेखनम्<br>(मञ्जूषायाः सहायतया चित्रवर्णनम् अनुच्छेदलेखनं वा करणीयम्) | 5 |
| 4. संवादपूर्तिः /कथापूर्तिः<br>(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णः संवादः / कथा लेखनीया) | 5 |
| **'ग' भागः**<br>**अनुप्रयुक्तव्याकरणम्** | **(25 अङ्काः)** |
| 5. उच्चारणस्थानानि | 2 |
| 6. सन्धिकार्यम्<br>स्वरसन्धिः (2 अङ्कौ)<br>➢ दीर्घः, गुणः, वृद्धिः, यण्, अयादि<br>व्यञ्जनसन्धिः (1 अङ्कः)<br>➢ वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम् , 'म्' स्थाने अनुस्वारः,<br>विसर्गसन्धिः (1 अङ्कः)<br>➢ उत्वम् , शत्वम्, षत्वम्, सत्वम् | 4 |

| | |
|---|---|
| 7. कारक-उपपद-विभक्तयः<br>➢ द्वितीया – समया/निकषा, प्रति, विना, परितः, उभयतः<br>➢ तृतीया – सह/ समम्/ सार्धम्, विना, अलम्, हीन<br>➢ चतुर्थी – रुच्, दा (यच्छ्), नमः, कुप्, अलम् (सामर्थ्ये)<br>➢ पञ्चमी – विना, बहिः , भी, रक्ष्<br>➢ षष्ठी – उपरि, अधः, पुरतः, पृष्ठतः, वामतः, दक्षिणतः<br>➢ सप्तमी- स्निह्, विश्वस्, निपुण, कुशल | 4 |
| 8. शब्दरूपाणि<br>अजन्ताः (3 अङ्काः)<br>पुँल्लिङ्गशब्दाः<br>➢ अजन्ताः - अकारान्तः - बालकवत्, इकारान्तः - कविवत्, उकारान्तः - साधुवत्<br>➢ हलन्तः - भवत्<br>स्त्रीलिङ्गशब्दाः<br>➢ अजन्ताः - आकारान्तः - लतावत्, ईकारान्तः - नदीवत्,<br>नपुंसकलिङ्गशब्दाः<br>➢ अजन्ताः - अकारान्तः - फलवत्<br>सर्वनामशब्दाः (1 अङ्कः)<br>➢ अस्मद्, युष्मद्, तत्, किम् (त्रिषु लिङ्गेषु) | 4 |
| 9. धातुरूपाणि<br>परस्मैपदिनः (3 अङ्काः)<br>➢ भू, नम्, गम्, अस्, प्रच्छ्, कृ, ज्ञा, क्षाल्, नी (पञ्चलकारेषु)<br>आत्मनेपदिनः (1 अङ्कः)<br>➢ सेव्, लभ्, रुच् - (लट्-लृट्लकारयोः) | 4 |
| 10. प्रत्ययाः<br>➢ क्त्वा, तुमुन्, ल्यप्, शतृ | 3 |
| 11. अव्ययानि<br>➢ स्थानबोधकानि – अत्र, तत्र, अन्यत्र, सर्वत्र, यत्र, एकत्र, उभयत्र<br>➢ कालबोधकानि – यदा,तदा, सर्वदा, एकदा, पुरा, अधुना, अद्य,श्वः,ह्यः<br>➢ प्रश्नबोधकानि – किम्,कुत्र,कति,कदा,कुतः,कथम्, किमर्थम्<br>➢ अन्यानि – च, अपि, यदि, तर्हि, यथा, तथा, सम्यक्, एव | 2 |
| 12. सङ्ख्या – 1-100 (1-4 केवलं प्रथमा-विभक्तौ) | 2 |

| 'घ' भागः<br>पठितावबोधनम् | (30 अङ्काः) |
|---|---|
| 13. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ – क्रिया पदचयनम्<br>➢ विशेषण – विशेष्य चयनम्<br>➢ पर्याय – विलोमपद – चयनम् | 5 |
| 14. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ – क्रिया पदचयनम्<br>➢ विशेषण – विशेष्य चयनम्<br>➢ पर्याय – विलोमपद – चयनम् | 5 |
| 15. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्<br>प्रश्नप्रकाराः – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि<br>भाषिककार्यम् –<br>➢ वाक्ये कर्तृ – क्रिया पदचयनम्<br>➢ विशेषण – विशेष्य चयनम्<br>➢ पर्याय – विलोमपद – चयनम् | 5 |
| 16. वाक्येषु रेखाङ्कितपदानि अधिकृत्य उचितप्रश्ननिर्माणम् | 5 |
| 17. एकस्य श्लोकस्य अन्वयः<br>(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णः अन्वयः लेखनीयः) | 2 |
| 18. पाठाधारित-कथापूर्तिः (मञ्जूषापदसहायतया रिक्तस्थानपूर्तिः) | 4 |
| 19. प्रसङ्गानुसारम् अर्थचयनम् (पाठान् आधृत्य बहुविकल्पात्मकाः प्रश्नाः) | 4 |

**आहत्य – अङ्काः - 80**

# परीक्षायै निर्धारिताः पाठाः

| पाठसङ्ख्या | पाठनाम | पाठसङ्ख्या | पाठनाम |
|---|---|---|---|
| प्रथमः पाठः | अविवेकः परमापदां पदम् | सप्तमः पाठः | तरवे नमोऽस्तु |
| द्वितीयः पाठः | पाथेयम् | अष्टमः पाठः | न धर्मवृद्धेषु वयः समीक्ष्यते |
| तृतीयः पाठः | विजयतां स्वदेशः | नवमः पाठः | कवयामि वयामि यामि |
| चतुर्थः पाठः | विद्यया भान्ति सद्गुणाः | दशमः पाठः | भारतीयं विज्ञानम् (केवलम् आन्तरिकमूल्याङ्कनाय) |
| पञ्चमः पाठः | कर्मणा याति संसिद्धिम् | | |
| षष्ठः पाठः | तत् त्वम् असि | एकादशः पाठः | भारतेनास्ति मे जीवनं जीवनम् (केवलम् आन्तरिकमूल्याङ्कनाय) |

## अवधेयम् -

* अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'मणिका-प्रथमो भागः इति' पाठ्यपुस्तकात् करणीयम्। यदि ततः न सम्भवति तर्हि 'मणिका-अभ्यासपुस्तकम्' इत्यस्मात् कर्तुं शक्यम्।

## निर्धारित – पाठ्यपुस्तके-

1. **'मणिका'- प्रथमो भागः,** पाठ्यपुस्तकम् (प्रकाशनम् - केन्द्रीय माध्यमिक शिक्षा बोर्ड)
2. **'मणिका-अभ्यासपुस्तकम्' - प्रथमो भागः** (प्रकाशनम् - केन्द्रीय माध्यमिक शिक्षा बोर्ड)

# आन्तरिक-मूल्याङ्कनम्
## (20 अङ्काः)

**उद्देश्यानि**

- ❖ छात्राणां सृजनात्मकक्षमतायाः विकासः।
- ❖ श्रवण-भाषण-पठन-लेखनकौशलानां विकासः।
- ❖ चिन्तनक्षमतायाः आत्मविश्वासस्य च संवर्धनम्।

| क्र. सं. | गतिविधयः | उदाहरणानि | अङ्काः | निर्देशाः | मूल्याङ्कनबिन्दवः |
|---|---|---|---|---|---|
| 1. | **आवधिक-परीक्षाः (पीरियोडिक् - असैस्मैंट)** | लिखितपरीक्षा | 05 | विद्यालयेन समये समये लिखितपरीक्षाणाम् आयोजनं करणीयं भवति। | परीक्षासु यत्र विद्यार्थिनः श्रेष्ठाः अङ्काः स्युः तयोः द्वयोः परीक्षयोः एव अधिभारः ग्रहीतव्यः। अपि च आवधिकपरीक्षासु अपि प्रश्नेषु आन्तरिकविकल्पाः देयाः। मूल्याङ्कनसमये यदि छात्रः सर्वान् प्रश्नान् उत्तरति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः सन्ति तेषाम् एव मूल्याङ्कनं करणीयम्। |
| 2 | **बहुविधमूल्याङ्कनम्** | ❖ कक्षायां पाठितस्य पाठस्य लघुमूल्याङ्कनम्<br>❖ निर्गतपत्राणि<br>❖ प्रश्नोत्तरी<br>❖ मौखिकी परीक्षा<br>❖ प्रतियोगिताः<br>❖ प्रश्नमञ्चस्यायोजनम् | 05 | कक्षायां पाठित-पाठस्य विषयस्य वा बहुविधं मूल्याङ्कनम् अपेक्षितम् अस्ति। अनेन विद्यार्थिनां विविधकौशलानां मूल्याङ्कनं भवेत्। | ❖मौलिकता<br>❖विषयसम्बद्धता<br>❖शुद्धता<br>❖समयबद्धता<br>❖प्रस्तुतीकरणम् |
| 3. | **निवेशसूचिका (पोर्टफोलियो)** | ❖ कक्षाकार्यम्<br>❖ सामूहिक-मूल्याङ्कनम्<br>❖ स्वमूल्याङ्कनम्<br>❖ विद्यार्थिनः विषयगताः उपलब्धयः | 05 | विद्यार्थिभिः कक्षायां कृतानां कार्याणाम् उपलब्धीनां च संरक्षणं संयोजनं च सञ्चिकायां पत्रावल्यां वा करणीयम्। एतेन समग्रं मूल्याङ्कनं प्रमाणिकत्वेन भवितुं शक्नोति। | ❖ सुलेखः<br>❖ तथ्यात्मकता<br>❖ प्रामाणिकता<br>❖ समयबद्धता |

| | | | | | |
|---|---|---|---|---|---|
| 4. | **भाषा-संवर्धनाय गतिविधयः**<br>**(क) श्रवण-भाषण-कौशलम्** | ❖ कथा<br>❖ संवादः/ वार्तालापः<br>❖ भाषणम्<br>❖ नाटकम्<br>❖ वार्ताः<br>❖ आशुभाषणम्<br>❖ संस्कृतगीतानि<br>❖ श्लोकोच्चारणम्<br>❖ प्रहेलिकाः | 05 | ❖ छात्राः कामपि कथां श्रावयितुं शक्नुवन्ति।<br>❖ शिक्षकः कमपि विषयं सूचयित्वा परस्परं संवादं कारयितुं शक्नोति।<br>❖ दूरदर्शने वार्तावली इत्याख्यः संस्कृत-कार्यक्रमः प्रसारितः भवति तं द्रष्टुं छात्राः प्रेरणीयाः।<br>❖ श्रवण-कौशल-मूल्याङ्कनाय शिक्षकः स्वयम् अपि कथां श्रावयित्वा ततः सम्बद्ध-प्रश्नान् प्रष्टुं शक्नोति। | ❖ उच्चारणम्<br>❖ शुद्धता<br>❖ समयबद्धता<br>❖ प्रस्तुतीकरणम्<br>(आरोहावरोह-गतियति-प्रयोगः) |
| | **(ख) लेखनकौशलम्** | ❖ विविधविषयान् आधृत्य मौलिकलेखनम् यथा– देशः, माता, पिता, गुरुः, विद्या पर्यावरणम्, योगः, समयस्य सदुपयोगः, शिक्षा, अनुशासनम् इत्यादयः।<br>❖ शैक्षिकभ्रमणस्य संस्कृतेन प्रतिवेदनलेखनम्।<br>❖ दैनन्दिनीलेखनम्।<br>❖ सङ्केताधारितं कथालेखनम्।<br>❖ भित्तिपत्रिकायाः निर्माणम्।<br>❖ श्रुतलेखः।<br>❖ सूक्तिलेखनम्। | | ❖ छात्राः यथाशक्यं कक्षायामेव लेखनकार्यं कुर्युः।<br>❖ टिप्पणी- पुस्तिकायाः निर्माणम्।<br>❖ वैयक्तिकपरीक्षणम्। | ❖ विषय-सम्बद्धता<br>❖ शुद्धता (विशेषतः पञ्चमवर्णस्यप्रयोगः)<br>❖ समयबद्धता<br>❖ सुलेखः<br>❖ प्रस्तुतीकरणम् |
| | **अवधातव्यम्** –उपर्युक्त-गतिविधयः उदाहरणरूपेण प्रदत्ताः सन्ति। एतदतिरिच्य एतादृशाः अन्यगतिविधयः अपि भवितुमर्हन्ति। | | | | |

***************************************


खण्डः - क
अपठितावबोधनम्

## ‘क’ खण्डः

### विषयः-1 अपठित गद्यांश (10 अङ्काः)

अपठितावबोधने 80-100 शब्दपरिमितः एकः अपठित गद्यांशः दीयते। तं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि।

**एकपदेन पूर्णवाक्येन च शुद्धोत्तरलेखनाय ध्यातव्याः विषयाः-**

1. प्रश्नवाचकपदम् किम् इति प्रथमं चिन्तयन्तु।
2. प्रश्नस्य अन्यपदानि अनुच्छेदस्य कस्मिन् वाक्ये सन्ति इति अवगच्छन्तु। तस्मिन् वाक्ये प्रश्नवाचकपदस्य लिंग-विभक्ति-वचनानूसानं यत् पदम् अस्ति तदेव उत्तरम् भवति।
3. प्रश्नवाचकपदानाम् आधारेण प्रश्नानाम् उत्तराणि लिंग-विभक्ति-वचनानुसारं लिखन्तु।

**शीर्षकलेखनम्**

1. शीर्षके एकपदम् वा पदद्वयं वा पदत्रयं वा एव भवतु।
2. शीर्षके अनुच्छेदस्य विषयाधारितम् प्रथमा-विभक्ति पदम् षष्ठीविभक्तिपदेन सह प्रथमा विभक्तिपदं वा लिखत। यथा-
   प्रथमाविभक्ति पदम्- भारतम्/ पर्यटनम्/ व्यायामः/ सदाचारः/ दिनचर्या आदयः।
   षष्ठीविभक्तिपदेन सह प्रथमाविभक्तिपदम्- पर्यापरणस्य रक्षा/ बुद्धेः बलम्/ भारतस्य संस्कृतिः/ कालिदासस्य रचना इत्यादयः।

**यथानिर्देशम् उत्तरत-** (भाषिककार्यम्)

- ☐ अस्मिन् वाक्ये कर्तृपदम् किम्/ क्रियापदम् किम्?
- ☐ अस्मिन् वाक्ये/ अनयोः पदयोः विशेषणपदं किम्/ विशेष्यपदम् किम्
- ☐ अस्मिन् अनुच्छेदे............ इति पदस्य समानार्थपदं किम्/ विलोमपदं किम्?

इत्येवं विधाः प्रश्नाः एव भवन्ति।

अभ्यासार्थम् अनुच्छेदाः

**(1)**

**अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

संस्कृतसाहित्ये महाकवेः बाणभट्टस्य स्थानं सर्वोपरि अस्ति। अयं स्वकीयायाः सर्वप्रथमायाः गद्यकृतेः ‘हर्षचरितस्य’ प्रारम्भिके उच्छवासत्रये स्वकीय परिचयं दत्तवान्। अस्य जन्म वत्स गोत्रे अभवत्। कविः बाणभट्टः सारस्वतः ब्राह्मणः आसीत्। अस्य एकः पूर्वजः ‘कुबेरः’ इति नामा आसीत्। यः संस्कृतभाषायाः प्रकाण्डविद्वान् आसीत्। कुबेरस्य पौत्रः अर्थपतिः, बाणस्य पितामहः आसीत्। बाणस्य पितुः नाम चित्रभानुः आसीत्। महाकविः बाणभट्टः बाल्यकाले अभिभावकविहीनः जातः। अयं भ्रमणशीलः आसीत्, येन कारणात् तेन अनेकविधानां जनानां सम्पर्कः प्राप्तः। एकदा सः महाराज हर्षस्य राजसभां प्राप्तवान्। हर्षस्य राज्ये कतिषुचित् दिनेषु एव अस्य चरित्रस्य पाण्डित्यस्य च प्रभावः रूढः जातः, फलतश्च महाराजेन हर्षेण अयम् ‘वश्यवाणी कविचक्रवर्ती’ इति उपाधिना विभूषितः। महाकविबाणस्य प्रमुखाः तिस्रः रचनाः सन्ति- ‘हर्षचरितम्’, ‘कादम्बरी’ चण्डीशतकम् च।

प्रश्नः 1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-

(क) महाकवेः बाणभट्टस्य प्रथमरचना किम् अस्ति?
(ख) बाणस्य जन्म कस्मिन् गोत्रे अभवत्?
(ग) कविः बाणभट्टः कः ब्राह्मणः आसीत्?
(घ) बाणस्य जनकस्य नाम किम् आसीत्?

प्रश्नः 2. अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत-

(क) कुबेरः कः आसीत्?
(ख) महाराजेन हर्षेण बाणः केन उपाधिना विभूषितः?
(ग) महाकवेः बाणस्य प्रमुखाः रचनाः कति सन्ति ?

प्रश्नः 3. निर्देशानुसारम् उत्तरं देयम्-

(क) “कुबेरस्य पौत्रः अर्थपतिः, बाणस्य पितामहः आसीत्”, वाक्यस्य कर्ता कः?
(ख) “अभवत् वत्सगोत्रे अस्य जन्म”, वाक्ये कर्तृ-क्रिया- अन्वितिः। कार्या।
(ग) “आचरणस्य” इत्यस्य पदस्य पर्यायवाचिपदं गद्यांशात् चित्वा लिखत्।

प्रश्नः 4. एतस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत्।

**(2)**

अस्माकं देशस्य नाम' भारतवर्षम्' इति अस्ति। पुरा अस्माकं देशे भरतनामा दुष्यन्तपुत्रः महाप्रतापी राजा बंभूव। तस्य एवं सम्बन्धात् अस्य देशस्य नाम अपि 'भारतम्' इति प्रसिद्धम्। अस्मदीयः देशः प्रकृति-सम्पन्नः अस्ति। अत्र षड् ऋतवः यथासमयम् आगत्य भारतं विविधाभिः सुषमाभिः भूषयन्ति। अस्य क्रणौ रलाकरः दिवानक्तं प्रक्षालयति। नगाधिराजः हिमालयः अस्य मुकुट-माधुरीम् आधत्ते। गङ्गा-यमुनाद्यनेकाः नद्यः विविधेभ्यः स्थानेभ्यः निर्गत्य अस्य पावनत्वम् आपादयन्ति। अस्य भूमिः उर्वरा अस्ति। सर्वविधम् अन्नम् अत्र उपद्यते। अस्माकं देशः विश्वगुरुः अस्ति। अयं सभ्यतायाः प्रकाशम् अन्येभ्यः देशेभ्यः दत्तवान्। 'भारतवर्षम्' अनेकेषां भाषा-वेश-धर्म-संस्कृति-परम्पराणां देशः अस्ति। अयं वस्तुतः एकः महान् देशः अस्ति। अयम् अस्मभ्यम् अस्माकं प्राणेभ्यः अपि प्रियतरः अस्ति।

प्रश्न: 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत–

(क) अस्माकं देशस्य नाम किम् अस्ति?

(ख) दुष्यन्तस्य पुत्रस्य नाम किम् आसीत्?

(ग) भारतस्य चरणौ कः दिवानक्तं प्रक्षालयति?

(घ) नगाधिराजः हिमालयः भारतवर्षस्य किम् अस्ति?

प्रश्न: 2.पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) कस्य सम्बन्धाद् अस्य देशस्य नाम 'भारतम्' प्रसिद्धम् अभवत्?

(ख) विश्वगुरुः कः अस्ति?

(ग) 'भारतवर्षम्' कीदृशः देशः अस्ति?

प्रश्नः 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) "अस्माकं देशस्य नाम भारतवर्षम् अस्ति" वाक्ये कर्ता कः?

(ख) "समुद्रः' इति शब्दस्य पर्यायम् अनुच्छेदात् चित्वा लिखत।

(ग) गत्वा' इति क्रियापदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

प्रश्न: 4. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**(3)**

संसारे अनेकाः संस्कृतयः अदिताः अस्तंगताश्च। परं भारतीया संस्कृतिः इदानीमपि अक्षुण्णा वर्तते। अस्याः जीवनरसमूले आध्यात्मिकी भावना विद्यते। भारतीया संस्कृतिः कर्मसिद्धान्ते विश्वसिति, पुनर्जन्म खलु ध्रुवं मनुते। मनुष्येण सदा उच्चस्तरीयचिन्तनेन सह सरलजीवन यापनीयम्। एषा धर्मप्रधानत्वेन 'आचारः परमो धर्मः' इति स्वीकृत्य धर्मभावनाम्, औदार्यं सहिष्णुतां, भ्रातृत्वं च इमान् गुणान् सदाचारं च परिपालयितुमुपदिशति। धर्मस्य पालनेन भौतिकी उन्नतिर्भवति, अलौकिकं सुखं च प्राप्यते। भारतीय संस्कृतिः आध्यात्मिकभावनया सर्वभूतेषु आत्मनः सत्तामवलोकयति। भारतीयजीवनमूल्यम् 'वसुधैव कुटुम्बकम्' एषा जीवने आचरति। भारतीय संस्कृतिः उत्कृष्टानां विचाराणामाचाराणां च समवायो विद्यते। लोकमंगलभावना अस्याः मूलसिद्धान्तः।

प्रश्न: 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) संसारे अनेकाः का: उदिताः अस्तंगताश्च?

(ख) भारतीयसंस्कृते: मूले का भावना विद्यते?

(ग) इदानीम् अपि का अक्षुण्णा वर्तते?

(घ) भारतीया संस्कृतिः किं खलु ध्रुवं मन्यते?

प्रश्न: 2.पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) भारतीया संस्कृति: किं मनुते?

(ख) मनुष्येण सदा कीदृशं जीवन यापनीयम्?

(ग) धर्मस्य पालनेन किं भवति?

प्रश्न: 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) उदिताः' एतस्य विपरीतार्थकः शब्दः अत्र किम्?

(ख) धर्मस्य पालनेन अलौकिकं सुखं प्राप्यते" वाक्ये कर्ता कः?

(ग) दिव्यं' इत्यस्य पदस्य समानार्थी पदं गद्यांशात् चित्वा लिखत।

प्रश्नः 4. अस्य गद्यांशस्य समुचितं शीर्षक लिखत।

**(4)**

पृथ्वीजलाकाशवनस्पतयः जीवाश्च पर्यावरणसर्जकाः सन्ति। प्रकृत्याः समग्रं रूपमेव पर्यावरणमिति कथ्यते। पर्यावरणेन अस्माकं शरीरं मनः स्वास्थ्यं च प्रभावितानि भवन्ति। वर्तमानकाले प्राकृतिकसंसाधनानाम् असन्तुलितदोहनेन औद्योगिकविस्तारेण चास्माकं मृवायुजलानि दूषितानि। अनेन न केवलं वयम् अपितु वृक्षलता-गुल्मवायुजलजीवाः सर्वेऽपि प्रभाविताः सन्ति। वृक्षवनस्पतीनां पशुपक्षिणां चानेकाः दुर्लभाः प्रजातयः विलुप्यन्ते। सघनवनानि नश्यन्ति। अस्माभिः प्रतिश्वास विषपानं क्रियते। सततं क्रियमाणेन औद्योगिकीकरणेन पैट्रोलचालितवाहनैः च प्राणवायुः न्यूनतां प्राप्नोति, विषयुक्तः कार्बनडाइऑक्साइडवायुः वृद्धिम् आप्नोति। वायुप्रदूषणम् अम्लीयवर्षारूपेण परिणमति। विषयुक्तेन वायुना पृथिव्याम् ऊष्मा वृद्धिम् आप्नोति। वायुप्रदूषणनिवारणाय वनस्पतीनां वनानां च संरक्षणं परमावश्यकम्। पर्यावरणविशेषज्ञ मतानुसारेण भूभागस्य तृतीयांशः वनाच्छादितः भवेत्।

प्रश्नः 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) प्रकृत्याः समग्र रूपमेव किम् कथ्यते?

(ख) वयम् अपि प्रतिश्वासेन सह किं पिबामः?

(ग) कंस्य निवारणाय वनानां संरक्षणं परमावश्यकम्?

(घ) पर्यावरणविशेषज्ञमतानुसारेण भूभागस्य कियान् अंशः वनाच्छादितः भवेत्?

प्रश्नः 2. पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) पर्यावरणसर्जकाः के सन्ति?

(ख) पर्यावरणेन अस्माकं कानि प्रभावितानि भवन्ति?

(ग) वर्तमानकाले केन कारणेन मृवायुजलानि दूषितानि?

प्रश्नः 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) "तस्याः समग्ररूपमेव पर्यावरणमिति कथ्यते" वाक्ये तस्याः सर्वनाम्नः स्थाने संज्ञाप्रयोगः कार्यः।

(ख) 'भाष्यते' इत्यस्य पर्यायम् अनुच्छेदात् चिनुत।

(ग) 'सुलभाः' इत्यस्य पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

प्रश्नः4. एतस्य गद्यखण्डस्य समुचितं शीर्षकं लिखत।

**(5)**

रामायणं मम अभीष्टतमः ग्रन्थः। अस्य लौकिककाव्यस्य प्रादुर्भावः वैदिकवाङ्मयानन्तरम् अभवत्। रामायणं लौकिक संस्कृतभाषानिबद्धमयम् आदिकाव्यम् इति कथ्यते। अस्य ग्रन्थस्य रचना आदिकविना वाल्मीकिना कृता। अस्मिन् महाकाव्ये भगवतो रामचन्द्रस्य चरितं वर्णितं वर्तते। अस्मिन् काव्ये सप्तकाण्डानि सन्ति। दशरथनन्दनो रामो मानवतायाः आदर्शभूतः। त्रेतायुगे जातस्य परमादर्शभूतस्य रघुवंशस्य विविधाः कथाः जनैः सावधानतया कथ्यन्ते श्रूयन्ते च। महर्षिणा वाल्मीकिना रघुवंशचूडामणेः श्रीरामभद्रस्य सर्वा कथा रामायणे विलिखिता। बालकाण्डतः उत्तरकाण्डावधिः श्रीरामचन्द्रस्य कथा मुनिना रामायणे विलिखिता। रसस्य परिपाकः, अलङ्काराणां विन्यासः लौकिकछन्दांसि च रामायणे सर्वोत्कृष्टत्वं प्राप्नुवन्ति।

प्रश्नः 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत-

(1) लेखककस्य अभीष्टतमः ग्रन्थः किम्?

(2) आदिकाव्यं किम् अस्ति?

(3) रामायणस्य रचना केन कृता?

(4) रामायणे कति काण्डानि सन्ति?

प्रश्नः 2. पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(1) रामायणस्य प्रादुर्भावः कदा अभवत्?

(2) रामायणे कस्य चरितं वर्णितम् अस्ति?

(3) काः कथाः जनैः सावधानतया श्रूयन्ते?

प्रश्नः 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(1) "रामायणम् आदिकाव्यं कथ्यते" वाक्ये क्रिया का?

(2) "ग्रन्थः अस्ति मर्म अभीष्टतमः रामायणम्' वाक्ये कर्तृ-क्रिया-अन्वितिः कार्या।

(3) अनेकाः' इत्यस्य पदस्य पर्यायवाचि पदं गद्यांशात् चित्वा लिखत।

प्रश्नः4. एतस्य गद्यखण्डस्य समुचितं शीर्षक देयम्।

**(6)**

अस्माकं राजस्थानं वीराणां जनको वर्तते। त्यागेन बलिदानेन च पूता अस्य भूमिः प्रणम्या। कवयः अपि काव्येषु अस्य गौरव-गीतानि गायन्ति। राजस्थानस्य वीराणां देशरक्षायै, स्वाभिमानं रक्षयितुञ्च कृतमात्मोस सगर्वं वदन्ति इतिहासविदः। राजस्थानस्य सभ्यतायाः उद्भवः विकासश्च अतिप्राचीनो वर्तते। कालीबंगा आहड़ादि स्थानेषु कृतेन उत्खननेन अस्याः सभ्यतायाः अस्तित्वं मोहनजोदड़ो-हड़प्पादिसभ्यतानां समकालिकं सिध्यति। पुरातात्विकसाक्ष्यैः सिध्यति यत् लक्षवर्षेभ्यः प्राक् राजस्थानस्य दक्षिणभागे बनासगम्भीरी बेड़चादिनदीनां च तटेषु निवासिनो मानवाः प्रस्तरयुगस्य आयुधैः मृगयां कुर्वन्ति स्म। प्रस्तरसभ्यतायाः चिह्नानि चर्मण्वत्यादिनदीनां समीपे समुपलब्धानि। ऋग्वेदानुसार राजस्थानीयस्य गंगानगरमण्डलस्य पूर्वस्यां सीमायां दृषद्वती सरित् वहति स्म प्रतीच्यां च सरस्वती नदी अवहत्। तस्मिन् समये अयं भू-भागः ब्रह्मावर्तनाम्ना कथ्यते स्म।

प्रश्न: 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) अस्माकं राजस्थानं केषां जनकः वर्तते?

(ख) के काव्येषु राजस्थानस्य गौरव-गीतानि गायन्ति?

(ग) कस्य: सभ्यतायाः उद्भवः विकासश्च अतिप्राचीनो वर्तते?

(घ) गंगानगरमण्डलस्य पूर्वस्यां सीमायां का सरित् वहति स्म?

प्रश्न: 2. पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) राजस्थानस्य विषये इतिहासविदः सगर्वं किं वदन्ति?

(ख) राजस्थानस्य सभ्यता कस्याः सभ्यतायाः समकालिकी सिध्यति?

(ग) लक्षवर्षेभ्यः प्राक् राजस्थानस्य दक्षिणभागे काः नद्यः वहन्ति स्म?

प्रश्नः 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) "कवयः अस्य गौरवगीतानि गायन्ति" वाक्ये क्रिया का?

(ख) 'प्राप्तानि' इत्यस्य शब्दस्य पर्यायम् अनुच्छेदात् चिनुत।

(ग) 'प्रस्तर सभ्यतायाः' इति पदे समास निर्देशम् कुरुत।

प्रश्न: 4. एतस्य गद्यखण्डस्य समुचितं शीर्षकं लिखत।

**(7)**

संसारे अनेकाः ऋतवः भवन्ति, किन्तु भारतवर्षे षड्ऋतवः प्रमुखाः सन्ति। तासां नामानि वसन्तः, ग्रीष्मः, वर्षा, शरद, हेमन्तः, शिशिरः सन्ति। एतासु ऋतुषु वर्षतः अति महत्त्वम् अस्ति यतो हि भारतदेशः एकः कृषिप्रधानदेशः अस्ति। भारतवर्षस्य कृषकाः ग्रामेषु एव वसन्ति। ते वर्षायाम् एव निर्भराः भवन्ति। ग्रीष्मतापेन सन्तप्तोऽयं लोकः वर्षासमये सुखानुभवं करोति। कृषकाः बलीवर्दान् संयोज्य क्षेत्रकर्षणमारभन्ते। क्षेत्रेषु एव भूरि शस्यं प्रजायते। सुवृष्ट्या मानवस्य जीवनं निर्विघ्नं प्रचलति। फल-पुष्प-लता-पादपादयः वनस्पतयः प्रसन्नतामभिव्यञ्जयन्ति। सायंसमये गोवः वनात् प्रतिनिवृत्य गोष्ठमुपगच्छन्ति। युवतयः वृक्षशाखासुदोलानन्दम् अनुभवन्ति। ब्रजस्थमन्दिरेषु 'घटाच्छटादर्शनम्' सज्जा प्रारभ्यते। वृन्दावने तु सर्वत्र रासलीलादर्शनं भवति।

प्रश्नः 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) भारतवर्षे कति ऋतवः प्रमुखाः सन्ति?

(ख) भारतदेशः कीदृशः देशोऽस्ति?

(ग) भारतदेशस्य कृषकाः कुत्र निवसन्ति?

(घ) रासलीलाया: दर्शनं कुत्र भवति?।

प्रश्न: 2. पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) षड्ऋतवः काः सन्ति?

(ख) अयं लोकः कदा सुखानुभवं करोति?

(ग) वर्षाकाले कृषकाः किं कुर्वन्ति ?

प्रश्नः 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) 'ग्रीष्मः' शब्दस्य विपरीतार्थकः शब्दः अत्र कः?

(ख) "कृषका: वर्षायामेव निर्भराः भवन्ति" वाक्ये 'कृषकाः' इति संज्ञायाः स्थाने सर्वनामप्रयोग: कर्तव्यः।

(ग) 'फल-पुष्प-लता-पादपयः-वनस्पतयः च अत्र समास निर्देशं कुरुत।

प्रश्नः4. एतस्य गद्यखण्डस्य समुचितं शीर्षक लिखत।

**(8)**

अस्माकं देशः कृषिप्रधान देशोऽस्ति। ग्रामेषु एव कृषिकर्म भवति यतोहि अत्र देशस्य बहुसंख्यकाः मनुष्याः ग्रामेषु एवं वसन्ति। ग्रामवासिनां जीवनं सुखमयं भवति। प्रकृत्याः मनोरमरूपं ग्रामवासिनेभ्यः प्रसन्नतां ददाति। कुत्रचित् हरितशस्यमयी स्थली शोभते, क्वचित् च हरितानि क्षेत्राणि राजन्ते। वृक्षाः शोभया, पवनः स्वसुगंधिना पुष्पाणि च रूपेण ग्रामवासिनो मनोरञ्जनं कुर्वन्ति। पक्षिणां मधुरः कलरवः कर्णयोः मधुधारा सिञ्चति। उपवनानां शोभा ग्रामवासिनां जीवने सरसतायाः मधुरतायाः च संचारं करोति। क्वचित् पुष्पाणि विकसन्ति तु क्वचित् गुञ्जन्तो भ्रमराः पुष्पेषु भ्रमन्ति तेषां मधु च पिबन्ति। ग्रामं परितः क्षेत्राणि पीतपुष्पैः। ग्रामवासिनां मनांसि मोहयन्ति। ग्रामीणजनाः प्रकृतेः क्रोडे वर्धन्ते। स्वच्छः पवनः, दिनकरस्य रश्मय, पवित्रं स्वच्छं च जलं ग्रामीणजनानां स्वास्थ्य वर्धयन्ति।

प्रश्नः 1. एकपदेन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) अस्माकं देशः कीदृशो देशोऽस्ति?

(ख) कृषिकर्म कुत्र भवति?

(ग) पुष्पेषु के भ्रमन्ति?

(घ) ग्रामवासिनो जीवनं कीदृशं भवति?

प्रश्नः 2. पूर्णवाक्येन उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) ग्रामेषु क्षेत्रेषु के राजन्ते?

(ख) ग्रामवासिनां मनोरञ्जनं के कुर्वन्ति?

(ग) उपवनानां शोभा किं करोति?

प्रश्नः 3. निर्देशानुसारम् उत्तरम् उत्तरपुस्तिकायां लिखत-

(क) 'अंके' इत्यस्य शब्दस्य पर्यायम् अनुच्छेदात् चिनुत।

(ख) "अस्माकं देश: कृषिप्रधान देशोऽस्ति" वाक्ये कर्ता कः?

(ग) 'दु:खमयम्' इत्यस्य पदस्य विलोम पदं गद्यांशात् चित्वा लिखत।

प्रश्नः 4. एतस्य गद्यखण्डस्य समुचितं शीर्षकं लिखत।

## उत्तरकुञ्ची

**उत्तर: (1)**

(1) एकपदेन:- (क) हर्षचरितम् (ख) वत्सगोत्रे (ग) सारस्वतः (घ) चित्रभानुः

(2) पूर्णवाक्येन:-

(क) कुबेरः बाणस्य पूर्वजः आसीत्, यः संस्कृतभाषायाः प्रकाण्डविद्वान् आसीत्।

(ख) महाराजेन हर्षेण बाणः 'वश्यवाणी कविचक्रवर्ती' इति उपाधिना विभूषितः।

(ग) महाकवेः बाणस्य प्रमुखाः रचना: तिस्रः सन्ति-हर्षचरितम्, कादम्बरी चण्डीशतकम् च।

(3) निर्देशानुसारम्:- (क) अर्थपति:। (ख) अस्य जन्म वत्सगोत्रे अभवत्। (ग) चरित्रस्य।

(4) शीर्षकं:- महाकविः बाणभट्टः।

**उत्तर: (2)**

(1) एकपदेन:- (क) 'भारतवर्षम्' (ख) भरतः (ग) रत्नाकरः (घ) मुकुटम्

(2) पूर्णवाक्येन:-

(क) दुष्यन्तपुत्रभरतस्य सम्बन्धाद् अस्य देशस्य नाम 'भारतम्' प्रसिद्धम् अभवत्।

(ख) अस्माकं देशः भारतवर्षम् 'विश्वगुरुः' अस्ति।

(ग) 'भारतवर्षम्' अनेकेषां भाषा-वेशधर्म-संस्कृति-परम्पराणां देशः अस्ति।

(3) निर्देशानुसारम्:- (क) भारतवर्षम् (ख) रत्नाकरः (ग) आगत्य।

(4) शीर्षकं:- 'भारतवर्षम्।

**उत्तर: (3)**

(1) एकपदेन:- (क) संस्कृतयः (ख) आध्यात्मिकी (ग) भारतीया संस्कृतिः (घ) पुनर्जन्म।

(2) पूर्णवाक्येन:-

(क) भारतीय संस्कृतिः कर्मसिद्धान्ते विश्वसिति. पुनर्जन्म खलु ध्रुवं मनुते च।

(ख) मनुष्येण सदा उच्चस्तरीयचिन्तनेन सह सरलजीवन यापनीयम्।

(ग) धर्मस्य पालनेन भौतिकी उन्नतिर्भवति, अलौकिकं सुखं च प्राप्यते।

(3) निर्देशानुसारम्:- (क) अस्तंगताः। (ख) अलौकिक सुखम्। (ग) अलौकिकं।
(4) शीर्षकं:- भारतीया संस्कृतिः।

**उत्तर: (4)**

(1) एकपदेन:- (क) पर्यावरणम्, (ख) विषम्, (ग) वायुप्रदूषणस्य, (घ) तृतीयांशः।
(2) पूर्णवाक्येन:-
(क) पृथ्वीजलाकाशवनस्पतयः जीवाश्च पर्यावरणसर्जकाः सन्ति।
(ख) पर्यावरणेन अस्माकं शरीरं, मनः स्वास्थ्यं च प्रभावितानि भवन्ति।
(ग) वर्तमानकाले प्राकृतिकसंसाधनानाम् असन्तुलितदोहनेन औद्योगिकविस्तारेण चास्माक मृवायुजलानि दूषितानि।
(3) निर्देशानुसारम्:- (क) प्रकृत्याः (ख) कथ्यते (ग) दुर्लभाः
(4) शीर्षकं:- पर्यावरणप्रदूषणम्।

**उत्तर: (5)**

(1) एकपदेन:- (क) रामायणम् (ख) रामायणम् (ग) वाल्मीकिना (घ) सप्त।
(2) पूर्णवाक्येन:-
(1) रामायणस्य प्रादुर्भाव; वैदिकवाङ्मयानन्तरम् अभवत्।
(2) रामायणे भगवतो रामचन्द्रस्य चरितं वर्णितम् अस्ति।
(3) त्रेतायुगे जातः रघुवंशस्य विविधाः कथाः जनैः सावधानतया श्रूयन्ते।
(3) निर्देशानुसारम्:- (क) कथ्यते। (ख) रामायणं मम अभीष्टतमः ग्रन्थः अस्ति। (ग) विविधाः।
(4) शीर्षकं:- रामायणम्।

**उत्तर: (6)**

(1) एकपदेन:- (क) वीराणाम् (ख) कवयः (ग) राजस्थानस्य (घ) दृषद्वती
(2) पूर्णवाक्येन:-
(क) राजस्थानस्य वीराणाम् आत्मोत्सर्गम् इतिहासविदः सगर्वं वदन्ति।
(ख) राजस्थानस्य सभ्यता मोहनजोदड़ोहड़प्पादिसभ्यतानां समकालिकी सिध्यति।
(ग) लक्षवर्षेभ्यः प्राक् राजस्थानस्य दक्षिणभागे बनासगम्भीरी बेड़चादयः नद्यः वहन्ति स्म।
(3) निर्देशानुसारम्:- (क) गायन्ति। (ख) समुपलब्धानि। (ग) षष्ठी तत्पुरुषः।
(4) शीर्षकं:- अस्माकं राजस्थानम्।

**उत्तर: (7)**

(1) एकपदेन:- (क) षड्ऋतवः (ख) कृषिप्रधानः (ग) ग्रामेषु(घ) वृन्दावने
(2) पूर्णवाक्येन:-
(क) वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः शिशिरः चे षड्ऋतवः सन्ति।
(ख) ग्रीष्मतापेन सन्तप्तोऽयं लोकः वर्षासमये सुखानुभवं करोति।
(ग) वर्षाकाले कृषकाः बलीवर्दान् संयोज्य क्षेत्रेषु कर्षणमारभन्ते।

(3) निर्देशानुसारम्:- (क) शिशिरः। (ख) ते (वे सब)। (ग) द्वन्द्व समासः।
(4) शीर्षकं:- वर्षाकालः।

**उत्तर: (8)**

(1) एकपदेन:- (क) कृषिप्रधानः (ख) ग्रामेषु (ग) भ्रमराः (घ) सुखमयम्
(2) पूर्णवाक्येन:-
(क) ग्रामेषु क्षेत्रेषु हरितशस्यमयी स्थली हरितानि क्षेत्राणि च राजन्ते।
(ख) वृक्षाः शोभया, पवनः स्वसुगन्धिना पुष्पाणि च रूपेण ग्रामवासिनां मनोरंजनं कुर्वन्ति।
(ग) उपवनानां शोभा ग्रामवासिनो जीवने सरसतायाः मधुरतायाश्च संचार करोति।
(3) निर्देशानुसारम्:- (क) क्रोडे(ख) अस्माकं देशः, (ग) सुखमयम्।
(4) शीर्षकं:- ग्राम्यजीवनम्।

*******************************************************************************************


ख - खण्डः
रचनात्मकं कार्यम्
पत्रलेखनम्

## 'ख' खण्डः ( 15 अङ्काः )

**विषयः-2, सङ्केताधारितम् औपचारिकं अथवा अनौपचारिक पत्रम्**

**पत्रलेखनम्-**

दूर रहने वाले अपने संबन्धियों अथवा मित्रों की कुशलता जानने के लिए तथा अपनी कुशलता का समाचार देने के लिए पत्र एक साधन है। इसके अतिरिक्त अन्य कार्यालयी कार्यों के लिए भी पत्र लिखे जाते है।

**पत्र के प्रकार-**

**1. अनौपचारिक पत्र-**

अनौपचारिक पत्र अपने परिवार, सम्बन्धी व मित्र किसी भी व्यक्ति ( जो परिचित है) को लिखा जाता है | इनको व्यक्तिगत पत्र भी कहा जाता है |

**2. औपचारिक पत्र-**

औपचारिक पत्र किसी भी कार्यालय में या संस्थान से जुड़े व्यक्ति को लिखा जाता है।

**नोट - परीक्षा में संकेत आधारित पत्र ही पूछे जाते हैं | जिसके लिए दस (10) रिक्त स्थान दिए होते हैं | साथ में दी गई मञ्जूषा में दिए गए 10 पदों से इन रिक्त स्थानों में समुचित पद भरते हुए पत्र को पुनः लिखना होता है | परीक्षा में सामान्यतः अनौपचारिक पत्र ही पूछे जाते हैं |**

**पत्र लिखते समय ध्यान देने योग्य बातें निम्न हैं-**

(i) पत्र के दायीं ओर स्थान अर्थात् भेजने वाले (प्रेषक) का पूरा पता तथा उसके नीचे दिनांक लिखी जाती है | स्थान के साथ पंचमी विभक्ति, ' तसिल्' (तः) प्रत्यय या नपुंसकलिंग प्रथमा विभक्ति , एकवचन का प्रयोग किया जा सकता है | जैसे – जयपुरात् , जयपुरतः, जयपुरम् आदि |

(ii) पत्र के बायीं ओर किनारे पर आदरसूचक, स्नेहसूचक संबोधन पदों का प्रयोग व्यक्ति के अनुरूप किया जाना चाहिए | जैसे – परमादरणीयाः पितृमहाभागाः ,प्रिय मित्र ! आदि |

(iii) संबोधन के नीचे यथानुरूप नमस्कारात्मक शब्द का प्रयोग किया जाना चाहिए | जैसे बड़ों के लिए प्रणामः, प्रणतिः, मित्रों के लिए – नमस्ते, वन्दे, नमोनमः आदि |

(iv) विषयवस्तु से पहले कुशल समाचार के लिए उपयुक्त पदों ( अत्र कुशलं तत्रास्तु )का प्रयोग किया जाना चाहिए |

(v) मुख्य विषय को ध्यानपूर्वक पढ़कर तथानुरूप मञ्जूषा से पदों का प्रयोग करें |

(vi) मुख्य विषय के बाद छोटे – बड़ों को यथायोग्य अभिवादन सूचक शब्दों का प्रयोग करें |

(vii) अंत में दाहिनी ओर प्रेषक (भेजने वाले) के रूप में यथायोग्य भवदीयः, विनीतः, शुभेच्छुः, भवदाज्ञाकारी ,तव अभिन्न मित्रम् आदि शब्दों का प्रयोग करके नीचे अपना नाम लिखना चाहिए |

औपचारिक-पत्र के निम्न सात अंग होते हैं :-

(1) पत्र प्रापक (प्राप्त करने वाला) का पदनाम तथा पता।

(2) विषय- जिसके बारे में पत्र लिखा जा रहा है, उसे केवल एक ही वाक्य में शब्द-संकेतों में लिखें।

(3) संबोधन- जिसे पत्र लिखा जा रहा है- महोदय/ महोदया/ माननीय आदि ।

(4) विषय-वस्तु-इसे दो अनुच्छेदों में लिखें :

पहला अनुच्छेद - अपनी समस्या के बारे में लिखें।

दूसरा अनुच्छेद - आप उनसे क्या अपेक्षा रखते हैं, उसे लिखें तथा धन्यवाद के साथ समाप्त करें।

(5) हस्ताक्षर व नाम- भवदीय/भवदीया के नीचे अपने हस्ताक्षर करें तथा उसके नीचे अपना नाम लिखें।

(6) प्रेषक का पता- शहर का मुहल्ला/इलाका, शहर, पिनकोड।

(7) दिनांक।

**अनौपचारिक पत्र का प्रारूप**

(i) स्थान --------

(ii) दिनांक -------

(iii) संबोधन ----------

(iv) अभिवादन ----------

(v) कुशलक्षेम ------------- (vi) मुख्य सन्देश ------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------------

(vii) उपसंहार -------( परिवारजनों को अभिवादन)

(ix) प्रापक के साथ प्रेषक का संबंध-----

(x) प्रेषक का नाम -----------

औपचारिक पत्र का प्रारूप -

प्रधानाचार्य को प्रार्थना-पत्र

1. सेवायाम्

प्रधानाचार्य : महोदय:,

2. विद्यालय का नाम व पता............

3. विषय : (पत्र लिखने के कारण)।

4. माननीय: महोदय:,

5. पहला अनुच्छेद .....................

दूसरा अनुच्छेद .....................

6. भवत: आज्ञाकारी शिष्य:,

क० ख० ग०

कक्षा.....................

7. दिनांक: .....................

## सम्बोधन/ अभिवादन/ निवेदन

| क्रम | सम्बन्ध | सम्बोधन | अभिवादन | निवेदन |
|---|---|---|---|---|
| 1. | पुत्र का पिता को | (i) पूज्यपाद पित: !<br>(ii) आदरणीय पितृपाद !<br>(iii) पूज्यपाद पितृमहोदय !<br>(iv) पूज्यपादा: पितृमहोदया: !<br>(v) परमश्रद्धेयेषु पितृचरणेषु ! | (i) सादरं नमो नम: ।<br>(ii) चरणारविन्देषु सादरं प्रणामम् ।<br>(iii) सादरं प्रणामम् ।<br>(iv) सादरं प्रणति: । | (i) भवदाज्ञाकारी पुत्र:<br>(ii) भवत: विनीत: बाल:<br>(iii) भवदीय: प्रिय: सुत:<br>(iv) भवत्प्रिय: सूनु:<br>(v) भवदाज्ञापालक: सुत: |
| 2. | पिता का पुत्र को | (i) प्रियपुत्र (नाम) ! | (i) चिरञ्जीव । | (i) त्वदीय: शुभचिन्तक: |
| 3. | मित्र का मित्र को | (i) प्रियमित्र (नाम) !<br>(ii) प्रियसुहृद् (नाम)! | (i) नमो नम: ।<br>(ii) सप्रेम/सस्नेह नमो नम: ।<br>(iii) नमस्ते, वन्दे, अभिनन्दनम् | (i) भवदीयं मित्रम्<br>(ii) तव स्निग्धं मित्रम्<br>(iii) भवद् बन्धु:<br>(iv) स्नेहाङ्कित: |
| 4. | छोटे भाई को (अनुज) | (i) प्रिय (नाम) !<br>(ii) प्रिय भ्रातृवर (नाम) ! | (i) शुभाशीर्वादम्<br>(ii) प्रसीदतु | (i) भवदीयो भ्राता<br>(ii) त्वदीयो भ्राता |
| 5. | बड़े भाई को (अग्रज) | (i) आदरणीयभ्रातृपद !<br>(ii) आदरणीयभ्रात: ! | (i) सादरं नमस्कारम् ! | (i) भवदीयो भ्राता<br>(ii) भवदाज्ञाकारी |
| 6. | बहन का बड़े भाई (अग्रज) के लिए | (i) आदरणीयभ्रात: ! | (i) नमस्कारम् | (i) भवदीया स्नेहाधीना भगिनी<br>(ii) भवदीया भगिनी |
| 7. | बहन का छोटे भाई (अनुज) को | (i) प्रियभ्रात: ! | (i) शुभाशीर्वादम् | (i) भवदीया भगिनी |
| 8. | भाई का बहन बड़ी/छोटी को | (i) आदरणीये भगिनि !<br>(ii) प्रिये भगिनि ! | (i) शुभाशीर्वादम् | (i) भवदीय: प्रियभ्राता<br>(ii) त्वदीय: प्रियभ्राता |
| 9. | प्रकाशक आदि के लिए | (i) श्रीमान् प्रकाशक महोदय ! | (i) नमो नम: | (i) भवदीय:/भवदीया<br>(ii) भवत्क:/निवेदक: |

## औपचारिक पत्राणि

***1. अस्वस्थतायाः हेतोः दिनद्वयस्य अवकाशार्थम् प्रधानाचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषायाः पदानि चित्वा रिक्तस्थानानि पूरयत- (अस्वस्थ होने के कारण दो दिन के अवकाश के लिए प्रधानाचार्य को लिखे गए प्रार्थना-पत्र में मञ्जूषा से पद चुनकर खाली स्थान भरिए।)***

क.ख.ग. विद्यालयः
नव दिल्ली |

सेवायाम् ,
श्रीमन्तः प्रधानाचार्य महोदयाः
(i) …………..
टैगोर गार्डन, नव दिल्ली |

विषय : एकस्य दिवसस्य (ii) …………. प्रार्थनापत्रम् |
आदरणीयाः (i) _______________।

सविनयं (ii) ____________ अस्ति यत् अहं (iii) ____________ आक्रान्तः अस्मि। एतस्मात् कारणात् विद्यालयम् आगन्तुम् (iv) _______________ अस्मि। अतः मह्यम् (v) _______________ अवकाशं प्रदाय (vi) _______________ अनुगृह्णन्तु। एतयोः दिवसयोः अध्ययनस्य या (vii) _______________ भविष्यति ताम् (viii) _______________ यतिष्ये।
(ix) _______________

भवदीयः शिष्यः
क, ख, ग

तिथिः (x) ________

| **मञ्जूषा-** दूरीकर्तुम्, हानिः, धन्यवादः, दिनद्वयस्य, प्रधानाचार्याः, असमर्थः, माम्, तीव्रज्वरेण, निवेदनम्, 20-8-20… |
|---|

उत्तराणि -

| | | | | |
|---|---|---|---|---|
| (i) प्रधानाचार्याः | (ii) निवेदनम् | (iii) तीव्रज्वरेण | (iv) असमर्थः | (v) दिनद्वयस्य |
| (vi) माम् | (vii) हानिः | (viii) दूरीकर्तुम् | (ix) धन्यवादः | (x) **20-8-20--** |

***प्रश्नः 2. विद्यालयस्य प्रधानाचार्यां प्रति लिखिते शुल्कक्षमाप्रार्थनापत्रे मञ्जूषायाः समुचितपदैः रिक्तस्थानानि पूरयत- (विद्यालय की प्रधानाचार्या को लिखे गए शुल्क माफी प्रार्थना-पत्र में मञ्जूषा के समुचित पदों से खाली स्थान भरिए।)***

परीक्षाभवनात्

सेवायाम् ,
श्रीमन्तः प्रधानाचार्य महोदयाः
आदरणीयाः (i) _______________
केन्द्रीयः विद्यालयः , गुरुग्रामः |

विषय- शुल्कक्षमापनार्थं निवेदनम् |
(ii) _______________
(iii) _______________ निवेदनम् अस्ति यत् मम पिता एकस्मिन् सर्वकारविद्यालये (iv) _______________ अस्ति। तस्य मासिकं (v) _______________ द्विसहस्र रूप्यकाणि अस्ति। अस्माकं परिवारे नव (vi) _______________ सन्ति। अस्मिन् सीमिते वर्तने विद्यालयस्य (vii) _______________ अतीव कठिनम् अस्ति। कृपया तदर्थं (viii) _______________ प्रदाय (ix) _______________ माम् अनुगृह्णन्तु।
(x) _______________

भवदीया आज्ञाकारिणी शिष्या
क, ख, ग

तिथि : 24-7-20……..

| मञ्जूषा- सधन्यवादम्, भवत्यः, शिक्षाशुल्कप्रदानम्, वर्तनम्, लिपिकः, महोदयाः, प्रधानाचार्याः, सदस्याः, सविनयम्, स्वीकृतिम् |
|---|

उत्तराणि-

(i) प्रधानाचार्याः (ii) महोदयाः (iii) सविनयम् (iv) लिपिकः (v) वर्तनम् (vi) सदस्याः
(vii) शिक्षाशुल्कप्रदानम् (viii) स्वीकृतिम् (ix) भवत्यः (x) सधन्यवादम्

***प्रश्नः 3) भवत्याः नाम लतिका। भवती 'सुरवाणी सन्देशः' इति पत्रिकां पठति । ग्राहक शुल्के समाप्ते सति अग्रिमवर्षार्थं शुल्कप्रेषणाय अत्र लिखिते पत्रे रिक्तस्थानपूर्तिः क्रियताम् |सहायतार्थे शब्दाः मञ्जूषायां प्रदत्ताः।। (आपका नाम लतिका है। आप 'सुरवाणी सन्देश' पत्रिका पढ़ती हैं। ग्राहक शुल्क समाप्त हो जाने पर अग्रिम वर्ष के लिए शुल्क भेजने के लिए लिखे गए पत्र में खाली स्थानों की पूर्ति कीजिए। सहायता के लिए शब्द मञ्जूषा में दिए गए हैं।)***

88, आदर्शनगरम्
दिल्ली-110033
1 दिसम्बर 20……

सेवायाम्,
(i)……………… सम्पादक महोदयः
नई दिल्ली |
सादरं (ii). ………………. ।
अहम् 'सुरवाणी सन्देशः' इति (iii)……………….. नियमिता पाठिका अस्मि । मम(iv)……………….. अस्य वर्षस्य दिसम्बरमासे समाप्तम् भवति। अतः अनेन पत्रेण (v)………………. वार्षिकं ग्राहकशुल्कं 110/- रूप्यकाणि 'स्टेट बैंक ऑफ इण्डिया' इति द्वारा (vi)……………… बैंक ड्राफ्ट संख्या 80065, 10-12-20…….. दिनाङ्कितं (vii)……………… । कृपया प्राप्तिपत्रं (viii)……………… अनुगृहीतां कुर्वन्तु ।
(ix)……….

(x) ………………..
संस्कृतोपासिका, लतिका

| मञ्जूषा- पत्रिकायाः, सार्धम्, आदरणीयः, सधन्यवादम्, संलग्नम्, ग्राहकशुल्कम्, प्रेषयित्वा, भवदीया, वन्दे, प्रदेयम् । |
|---|

उत्तरम्

88, आदर्शनगरम्
दिल्ली-110033
11 दिसम्बर 20…………..

सेवायाम्,
(i) आदरणीयः सम्पादक महोदयः
नई दिल्ली |
सादरं (ii) वन्दे।
अहम् 'सुरवाणी सन्देशः' इति (iii) पत्रिकायाः नियमिता पाठिका अस्मि। मम (iv) ग्राहकशुल्कम् अस्य वर्षस्य दिसम्बरमासे समाप्तम् भवति । अतः अनेन पत्रेण (v) सार्धम् वार्षिकं ग्राहकशुल्कं 110/- रुप्यकाणि 'स्टेट बैंक ऑफ इण्डिया' इति द्वारा (vi) प्रदेयम् बैंक ड्राफ्ट संख्या 80065, 10-12-20…….. दिनाङ्कितं (vii) संलग्नम्। कृपया प्राप्तिपत्रं (viii) प्रेषयित्वा अनुगृहीतां कुर्वन्तु।
(ix) सधन्यवादम्

(x)भवदीया .
संस्कृतोपासिका , लतिका

**प्रश्नः 4. भवान् प्रियंवदः ,पश्चिमी दिल्ली क्षेत्रस्य मधुविहारे वसति। भवतः क्षेत्रे द्विनद्वयात् विद्युत् न आगच्छत्। अतः सर्वे क्षेत्रवासिनां पक्षतः आवासीय-कल्याण-संगठनस्य (R.W.A.) सचिवं प्रति तं निवेदयितुम् समस्यायाः समाधानाय इदं पत्रं मञ्जूषायाः पदानां सहायतया लिखतु भवान्। (आप प्रियंवद पश्चिमी दिल्ली क्षेत्र के मधु विहार क्षेत्र में रहते हैं। आपके क्षेत्र में दो दिनों से बिजली नहीं आई। इसलिए सब क्षेत्रवासियों की ओर से आवासीय-कल्याण-संगठन (R.W.A.) के मंत्री को समस्या के समाधान हेतु निवेदन करते हुए मंजूषा के शब्दों की सहायता से आप पत्र लिखिए।)**

गृहसंख्या 10, वीथिका संख्या-2
मधुविहारम्, नव दिल्ली
दिनाङ्कः 10.10.20……..

सेवायाम्,
सचिवः
आवासीय-कल्याण-संगठनम् (R.W.A.)
(i) ………
नव दिल्ली
विषय : - वीथिका संख्या द्वयस्य क्षेत्रस्य विद्युत् समस्यायाः समाधानाय निवेदनम्।
महोदयः ,
निवेदनम् अस्ति यत् अस्माकं (ii) ………… विगत द्विनद्वयात् विद्युत् न (iii)…………अतः सर्वे जनाः महिलाः बालाश्च अतीव दु:खिनः सन्ति। सम्प्रति तु (iv) …………….. परीक्षाः भवन्ति। वर्षाकालः अपि वर्तते। स्थान-स्थाने तु (v) …………….. एव दृश्यते। अनेन जनानां सामान्य-व्यवहारमेव न चलति। अहम् अनेकवारं विद्युत्-. विभागस्य (vi) ……………. निवेदितवान्। परम् केवलं आश्वासनम् एव (vi) ……………. अभवत्। कार्यस्य उपरि केनापि ध्यानं न दत्तम्। अतः भवद्भ्यः प्रार्थये यत् अस्याः (viii) …………….. समाधानं शीघ्रमेव कारयतु भवान्; येन सर्वेषां कष्टानि दूरी भवन्तु। भवदीयः (ix) ……………. आभारिणः भविष्यामः। सधन्यवादम् !

निवेदकाः
(x) ……..

| मञ्जूषा - सर्वे वीथिकावासिनः, समस्यायाः, मधुविहारम्, वयम्, छात्राणां, प्राप्तम्, क्षेत्रे, जलम्, अधिकारिणः, आगच्छत्। |
|---|

उत्तरम् -

गृहसंख्या
वीथिका संख्या-2
मधुविहारम्, नव दिल्ली
दिनाङ्कः 10.10.2022

सेवायाम्,
सचिवः
आवासीय-कल्याण-संगठनस्य (R.W.A.)
(i)मधुविहारम्, नव दिल्ली
विषय : वीथिका संख्या द्वयस्य क्षेत्रस्य विद्युत् समास्यायाः समाधानाय निवेदनम्।
महोदयः,
निवेदनम् अस्ति यत् अस्माकं (ii) क्षेत्रे विगत द्विनद्वयात् विद्युत् न (iii) आगच्छत्। अतः सर्वे जनाः महिलाः बालाश्च अतीव दु:खिनः सन्ति। सम्प्रति तु (iv) छात्राणां परीक्षाः भवन्ति। वर्षाकालः अपि वर्तते। स्थान-स्थाने तु (v) जलम् एव दृश्यते। अनेन जनानां सामान्य व्यवहारमेव न चलति। अहम् अनेकवारं विद्युत्-विभागस्य (vi) अधिकारिणः निवेदितवान्। परम् केवलं आश्वासनम् एव (vii) प्राप्तम् अभवत्। कार्यस्य उपरि केनापि ध्यानं न दत्तम्। अतः भवद्भ्यः प्रार्थये यत् अस्याः (viii) समस्यायाः, समाधानं शीघ्रमेव कारयतु भवान्; येन सर्वेषां कष्टानि दूरी भवन्तु। भवदीयः (ix) वयम् आभारिणः भविष्यामः।
सधन्यवादम्

निवेदकाः
(x) सर्वे वीथिकावासिनः

***प्रश्नः 5. मञ्जूषायां प्रदत्तानां पदानां सहायतया पुस्तक-प्रेषणार्थं प्रकाशकं प्रति पत्रं लिखत।***
***(मञ्जूषा में दिए गए शब्दों की सहायता से पुस्तक भेजने के लिए प्रकाशक को पत्र लिखिए।)***

सेवायाम्,
श्रीमान् (i) ………….. ,
(ii) ………………,

जवाहरलाल नेहरू मार्गः, पुणे।

विषय: - पुस्तक-प्रेषणार्थम् |
मान्यवराः,
अहं (iii) ………….. छात्रः अस्मि । भवद्भिः सद्यः प्रकाशितानि नवमकक्षायाः (iv) ………….. मया (v) अहं तेषु कानिचित् पुस्तकानि क्रेतुम् इच्छामि। कृपया अधोलिखितानि पाठ्यपुस्तकानि (vi) ……………. द्वारा शीघ्र (vii) …………..।
1. सरल संस्कृत व्याकरणम्।
2. शेमुषी संस्कृत पाठ्यपुस्तकम्।
(viii) ………………….
(ix) ………..,
आलोकनाथः
(x) ……………….,
हिमगिरि आवास योजना
नव दिल्ली -110090

| **मञ्जूषा-** नवमकक्षायाः, प्रबन्धक-महोदयः, गृहसंख्या 27, श्री अक्षर प्रकाशन संस्था, पाठ्यपुस्तकानि, वी.पी.पी., भवताम् विश्वासपात्रः, प्रेषणीयानि, दृष्टानि, सधन्यवादम्। |
|---|

उत्तरम् –
सेवायाम्,
श्रीमान् (i) प्रबन्धक-महोदयः,
(ii) श्री अक्षर प्रकाशन संस्था,
जवाहरलाल नेहरू मार्गः, पुणे।

विषय: - पुस्तक-प्रेषणार्थम् |
मान्यवराः,
अहं (iii) नवमकक्षायाः छात्रः अस्मि । भवद्भिः सद्यः प्रकाशितानि नवमकक्षायाः (iv) पाठ्यपुस्तकानि मया (v) दृष्टानि। अहं तेषु कानिचित् पुस्तकानि क्रेतुम् इच्छामि। कृपया अधोलिखितानि पाठ्यपुस्तकानि (vi) वी.पी.पी. द्वारा शीघ्रं (vii) प्रेषणीयानि।
1. सरल संस्कृत व्याकरणम्।
2. मणिका संस्कृत अभ्यासपुस्तकम् ।
(viii) सधन्यवादम्।

(IX) भवताम् विश्वासपात्रः,
आलोकनाथः
(x) गृहसंख्या 27,
हिमगिरि आवास योजना
नव दिल्ली -110090

*****************************************************************************************

## अनौपचारिकपत्र - लेखनम्

**1. भवान् सोमेशः। भवताम् विद्यालये गीतायाः श्लोकानाम् अन्त्याक्षरी आयोज्यते। स्वमित्रं देवांशः प्रति लिखिते अस्मिन् पत्रे मंजूषातः उचितानि पदानि गृहीत्वा रिक्तस्थानानि पूरयत।** **½x10=5**

गंगाछात्रावास:
(1)……………..
दिनांक: 02-10-2022

प्रिय मित्र (2)……………….
(3)………………..

अत्र सर्वं कुशलम्। अस्माकम् विद्यालये संस्कृतदिवसे एका (4)..........आयोज्यते। अस्माकं प्रतियोगिता (5)………… कक्षायाः छात्रैः (6)......... भविष्यति। अहम् स्वकक्षायाः प्रतिनिधिः। भवान् अपि तस्मिन् दिवसे अत्र आगत्य (7)……….. पश्यतु इति निवेदनम्। भवतः मातृपितृचरणयोः (8) ………………।

(9)................अभिन्नं मित्रम्

(10) .................

| |
|---|
| **मञ्जूषा-** सह, कार्यक्रमम्, अन्त्याक्षरीप्रतियोगिता, नमो नमः, प्रणामाः, सोमेशः, देवांश!, जयपुरतः, भवताम्, दशम्याः। |

उत्तराणि-(1) जयपुरतः (2) देवांश! (3) नमो नमः, (4) अन्त्याक्षरीप्रतियोगिता, (5) दशम्याः, (6) सह, (7) कार्यक्रमम्, (8) प्रणामाः, (9) भवताम्, (10) सोमेशः।

***प्रश्नः 2) विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं प्रति लिखिते पत्रे मञ्जूषाशब्दैः रिक्तस्थानपूर्तिं कुरुत।***
***(विद्यालय के वार्षिकोत्सव को अधिकृत करके मित्र को लिखे गए पत्र में मञ्जूषा के शब्दों से रिक्त स्थान की पूर्ति कीजिए।) (Complete this letter, with suitable words from the box, written to your friend specially mentioning the annual function of the school.)***

(i) ____________

कुरुक्षेत्रम्।

तिथिः 10.10.20……

प्रिय (ii) ____________

(iii) ____________ तव पत्रम् अधिगतम्। मया पत्रेण ज्ञातं यत् गत सप्ताहे विद्यालयस्य (iv) ____________ आसीत्। त्वं सर्वे अध्यापकाः च (v) ____________ अतिष्ठन्। कार्यक्रमस्य मुख्यातिथिः (vi) ____________ आसीत्। सः (vii) ____________ कार्यक्रमस्य प्रशंसाम् अकरोत्। (viii) ____________ छात्रेभ्यः पुरस्कारान् प्रायच्छत्। पितृभ्यां सादरं (ix) ____________

भवतः (x) ____________

क०ख०ग०

| |
|---|
| **मञ्जूषा-** शिक्षानिदेशकः, मया, परीक्षाभवनम्, वार्षिकोत्सवः, व्यस्ताः, प्रणामाः, युष्माकम्, योग्येभ्यः, प्रियमित्रम्, मित्र ! |

उत्तराणि-

(i) परीक्षाभवनम्

कुरुक्षेत्रम्।

तिथिः 10.10.20…

प्रिय (ii) मित्र !

(iii) मया तव पत्रम् अधिगतम्। मया पत्रेण ज्ञातं यत् गत सप्ताहे विद्यालयस्य (iv) वार्षिकोत्सवः आसीत्। त्वं सर्वे अध्यापकाः च (v) व्यस्ताः अतिष्ठन्। कार्यक्रमस्य मुख्यातिथिः (vi) शिक्षानिदेशकः आसीत्। सः (vii) युष्माकम् कार्यक्रमस्य प्रशंसाम् अकरोत्। (viii) योग्येभ्यः छात्रेभ्यः पुरस्कारान् प्रायच्छत्। पितृभ्यां सादरं (ix) प्रणामाः।

भवतः (x) प्रियमित्रम्,

क०ख०ग०

| भू | + | शतृ | भवत् | भवन् | भवन्ती | भवत् |
| मिल् | + | शतृ | मिलत् | मिलन् | मिलन्ती | मिलत् |

| | | | | | | |
|---|---|---|---|---|---|---|
| नी | + | शतृ | नयत् | नयन् | नयन्ती | नयत् |
| गण् | + | शतृ | गणयत् | गणयन् | गणयन्ती | गणयत् |
| चिन्त् | + | शत | चिन्तयत् | ‘चिन्तयन् | चिन्तयन्ती | चिन्तयत |
| घ्रा | + | शतृ | जिघ्रत् | जिघ्रन् | जिघ्रन्ती | जिघ्रत् |
| दा | + | शतृ | यच्छत् | यच्छन् | यच्छन्ती | यच्छत् |
| नृत् | + | शतृ | नृत्यत् | नृत्यन् | नृत्यन्ती | नत्यत् |
| पा | + | शतृ | पिबत् | पिबन् | पिबन्ती | पिबत् |
| प्रच्छ् | + | शतृ | पृच्छत् | पृच्छन् | पृच्छन्ती | पृच्छत् |

*******************************************************************************************

# विषय:-11 अव्यया:

**अव्ययस्यार्थ:-**
**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्॥**

अर्थात् जिन शब्दों में लिंग, कारक और वचन के कारण किसी प्रकार का विकार (परिवर्तन) नहीं होता और जो प्रत्येक दशा में एक समान रहते हैं, उन्हें अव्यय शब्द कहते हैं।

नवमकक्षया: पाठ्यक्रमे 31 अव्यया: निर्धारिता: सन्ति।

ते यथा-

**स्थानबोधकानि**- अत्र, तत्र, अन्यत्र, सर्वत्र, यत्र, एकत्र,उभयत्र।

**कालबोधकानि**- यदा,तदा, सर्वदा, एकदा, पुरा, अधुना,अद्य,श्व:,ह्य:।

**प्रश्नबोधकानि**- किम्, कुत्र, कति, कदा, कुत:, कथम्,किमर्थम्।

**अन्यानि**- च, अपि, यदि, तर्हि, यथा, तथा, सम्यक्, एव।

| **अव्यय:** | **हिन्दी अर्थ-** | **अव्यय:** | **हिन्दी अर्थ-** |
|---|---|---|---|
| अत्र | यहाँ | तत्र | वहाँ |
| यदा | जब | सर्वदा | सब जगह |
| किम् | क्या | कुत्र | कहाँ |
| चऔर | अपि | भी | |
| अन्यत्र | दूसरी जगह | सर्वत्र | सभी जगह |
| एकदा | एकबार | पुरा | पहले |
| कति | कितना | कदा | कब |
| यदि | अगर | तर्हि | तो |
| यत्र | जहाँ | एकत्र | एक जगह |
| अधुना | इस समय | अद्य | आज |
| कुत: | कहाँ से | कथम् | कैसे |
| यथा | जैसे | तथा | वैसे |
| उभयत्र | दोनों जगह | श्व: | आने वाला कल |
| ह्य: | बीता हुआ कल | तदा | तब |
| किमर्थम् | किस लिए | | |
| सम्यक् | ठीक/अच्छा | एव | ही |

**अव्ययपदै: सह वाक्यनिर्माणम्**

**1. अत्र (यहाँ)**

अत्र धनं नास्ति।
अत्र जलाशयं नास्ति।
अत्र ज्ञानम् मिलति।
अत्र सुखम् अस्ति।
अत्र जना: सन्ति।

**2. यत्र (जहाँ)**

यत्र नार्य: पुज्यन्ते तत्र देवन्ता रमन्ते।
यत्र पठनम् तत्र साफल्यम् भवति।
यत्र स्वास्थ्यं तत्र नीरोगत्वम्।
यत्र-तत्र (जहां-तहां)
जना: यत्र-तत्र कर्गदानि क्षिपन्ति।

**3. तत्र (वहाँ)**

तत्र विद्यालय: अस्ति।
तत्र जन्तुशाला नास्ति।

**4. यदा (जब)**

यदा वसन्तर्तु: तदा कोकिलगानम्।
यदा गा: तदा दुग्धम्।

तत्र क्रीडाक्षेत्रम् अस्ति।
तत्र बालका: क्रीडन्ति।
तत्र धावका: धावन्ति।

यदा धनम् तदा सुखम्।
यदा धर्मस्य ग्लानि भवति तदा ईश्वर: आत्मानं सृजति।
(अत्र तदा इत्यस्यापि प्रयोगा: कर्तुं शक्यन्ते)

**5. अत्र-तत्र (यहाँ-वहाँ)**

यदि अत्र कार्यम् ,तत्र अपि कार्यम् अस्ति।
यदि अत्र सुखं, तत्र अपि सुखं भवति।
अत्र नृत्यम्,तत्र उल्लास:
अत्र कुशलं तत्रास्तु ।
संन्यासिन: अत्र-तत्र अटन्ति।

**6. सर्वदा (हमेशा)**

भक्त: ईश्वरं सर्वदा भजति।
सर्वदा सत्यं वद।
सर्वदा सूर्यं उदेति।
स्वावलम्बी सर्वदा सुखम् अनुभवति।
वृक्षा: सर्वदा प्राणवायुं ददति।

**7. किम् (क्या)**

अध्यापक: विद्यालये किं करोति?
छात्रा: विद्यालयेषु किं कुर्वन्ति?
धनिक: धनस्य किं करोति?
वैज्ञानिका: प्रयोगशालासु किं कुर्वन्ति?
इत: अधिकं स: किं जानाति?
(किम् इति शब्दस्य प्रयोग: सर्वनाम शब्देषु भवति)

**8. कुत्र (कहाँ)**

उदयपुरं कुत्र अस्ति।
राम: कुत्र वसति।
जना: कुत्र गच्छन्ति।
एतत् यानं कुत्र गच्छति।
कन्याकुमारी कुत्र अस्ति।

**9. च(और)**

राम: च लक्ष्मण: च सीता च वनं गच्छन्ति।
राम: लक्ष्मण: सीता च वनं गच्छन्ति।
लता राधा च मित्रे आस्ताम्।
राम: श्याम: च गायत:।
आम्रं कदलीफलं द्राक्षाफलं च मधुराणि भवन्ति।

**10. सर्वत्र (सभी जगह)**

जलं सर्वत्र उपलभ्यते।
वायु: सर्वत्र वहति/चलति।
जना: सर्वत्र निवन्ति।
वने सर्वत्र वृक्षा: सन्ति।
उद्यानेषु सर्वत्र पुष्पाणि सन्ति।

**11. अपि (भी)**

त्वं विद्यालयं चल अहम् अपि चलामि।
त्वया सह अहम् अपि पठामि।
लतया सह सुरेश: अपि नृत्यति।
शैत्येन सह हिमपातम् अपि अभवत्
गीतेन सह नृत्यम् अपि भवति।

**12. कति (कितना / संख्यावाचक अव्यय)**

कक्षायां कति छात्रा: सन्ति?
अस्मिन् विद्यालये कति बालका: पठन्ति?
अस्मिन् स्यूते कति फलानि सन्ति?
एकस्मिन् वर्षे कति दिनानि भवन्ति?

**13. अन्यत्र (दूसरी जगह/और कहीं )**

अध्यनसामग्री अन्यत्र अस्ति।
कार्यालयस्य वस्तूनि अन्यत्र सन्ति।
कृष्ण: अन्यत्र वसति।
एतत् अन्यत्र स्थापय।

**14. कदा (कदा / स्थानवाचक अव्यय)**

स्वतन्त्रता दिवस: कदा भवति।
हेमन्तर्तु: कदा आयाति।
मम मातुल: कदा आगमिष्यति।
ग्रीष्मावकाश: कदा आयाति।
स: विद्यालयं कदा गमिष्यति।

**15. एकदा (एकबार)**

मोहन: एकदा देहल्यां गतवान्।
एकदा एक: दयालु: राजा आसीत्।
एकदा अहं तं द्रष्टुम् इच्छामि।
अहम् अपि एकदा अयोध्यां गन्तुमिच्छामि।

**16. यदि(अगर) 17.तर्हि(तो) (यदि-तर्हि)**

यदि मेघा: सन्ति तर्हि वृष्टि: भविष्यति।
यदि परिश्रम: करिष्यति तर्हि सफलतां प्राप्स्यति।
यदि धनं नास्ति तर्हि कुत: सुखम्।
यदि निर्जनं देशं तर्हि कुत: भोजनम्।

**18. पुरा(बहुत पहले/पुराने समय में)**
पुरा एक: धनिक: बभुव:।
पुरा कोऽपि शिवी नाम्ना राजा बभुव।
पुरा कस्मिंश्चिद् वने एका वृद्धा आसीत्।
पुरा नारसिंह: नाम्ना सिंह: आसीत्।

19**. सम्यक् (ठीक/भलीभाँती)**
राम: लताया: व्यवहारं सम्यक् जानाति।
स: तेन सह सम्यक् आचरति।
लता सम्यक् श्लोकपाठं करोति।
शिक्षक: सम्यक् पाठयति।
तत्रत: आवासव्यवस्था सम्यक् अस्ति।

20**. यथा** 21**. तथा (यथा-तथा)**
यथा देश: तथा वेश:।
यथा राजा तथा प्रजा:।
यथा गुणा: तथा पूजा।
याथा भोजनं तथा पोषणम्।
यथा गुरव: तथा शिष्या:।

**22. अधुना(अब / आजकल)**
अधुना वैज्ञानिकं युगं वर्तते।
अधुना अहं पठामि।
अधुना प्रार्थनाया: वेला जाता।
अधुना अहं किं कारोमि।
अधुना तु तस्य आगमनस्य समय: जात:।

**23. एव (ही)**
सत्यम् एव जयति।
सत्यम् एव विजयते।
करी एव सिंहस्य बलं वेत्ति।
ईश्वर एव जगत: रहस्यं जानाति।
ज्ञानिन: एव सम्यक् कथयन्ति।

**24. श्व:(कल-आने वाला )**
श्व: तस्य कार्यालस्य अवकाश: भविष्यति।
श्व: तस्य परीक्षा भविष्यति।
श्व: मंगलवासर: भविष्यति।
स: श्व: मातुलगृहं गमिष्यति।
लताया: माता श्व: आगमिष्यति।

**25. अद्य(आज)**
अद्य सोमवासर: अस्ति।
अद्य गणतन्त्रदिवस: अस्ति।
अद्य गुरुनानक जयन्ती अस्ति।
अद्य मम जन्मदिवस: अस्ति।
अद्य तस्य विद्यालयस्य अवकाश: अस्ति।

**26. ह्य:(कल-बीता हुआ)**
ह्य: बुधवासर: आसीत्।
ह्य: तस्य जन्मदिवस: आसीत्।
स: तु ह्य: एव आह्गतवान्।
ह्य: जन्माष्टमी आसीत्।
स: ह्य: एव जयपुरं गतवान्।

**27. एकत्र(एक जगह/इकट्ठा होना)**
सर्वाणि वस्तूनि एकत्र सन्ति।
ते सभागारे एकत्र भवन्ति।
राम: विकीर्णानि फलानि एकत्र करोति।
प्रार्थना सभायां छात्रा: एकत्र भवन्ति।
वर्षा काले जलं एकत्र भवति।

**28. उभयत्र(दोनों ओर) (ध्यातव्य-उभयत्र उपपदविभक्ति नास्ति)**
विद्यालयस्य उभयत्र वृक्षा: सन्ति।
छात्रा: उभयत्र न गच्छन्ति।
मनसी वचसी उभयत्र सत्यता आवश्यकी।
मञ्चस्य उभयत्र आसनानि सन्ति।

**29. कुत:(कहाँ से)**
गंगा कुत: प्रभवति?
रमेश: अद्य कुत: आयाति?
प्रस्तराणि कुत: आयान्ति?
नगरेषु फलानि कुत: आयान्ति?
अत्र दुग्धं कुत: आयाति?
मतुलचन्द्र! कुत: आगच्छति?

**30. किमर्थम्(किस लिए)**
भवान् किमर्थं उच्चै: वदति?
ते किमर्थं कोलाहलं कुर्वन्ति?
एतत् सभागारं किमर्थं निर्मितम्?
अस्या: सभाया: आयोजनं किमर्थम् अभवत्?
कथं स: पापभाक् भविष्यति?

**31.कथम्(कैसे)**
स: एतस्य रहस्यं कथं जानाति?

स: एतत् दुष्करं कथं कर्तुं शक्यते?
स: विद्यालये कथं गच्छति?
चटका कथं विहरति?
मयूर: कथं नृत्यति?
धावक: कथं धावति?

---

**अभ्यासकार्यम्** (लघूत्तरात्मका प्रश्ना:)

**प्र.1 मञ्जूषात: समुचितम् अव्ययपदं चित्वा वाक्यानि पूरयत-(1/2x4=2)**

| यदा | श्व: | तदा | ह्य: |
|---|---|---|---|

(क) -----------आम्रवृक्षा: प्रफुल्लन्ति तदा कोकिला: अपि गायन्ति।
(ख) रमेश: ---------मातुलस्य गृहं गमिष्यति।
(ग) ----------रमाया: जन्म-दिवस: आसीत्।
(घ) यदा चौर: आयाति-------कुक्कुरा: बुक्कन्ति।

**प्र.2 मञ्जूषात: समुचितम् अव्ययपदं चित्वा वाक्यानि पूरयत-(1/2x4=2)**

| किमर्थम् | अपि | तथा | तर्हि |
|---|---|---|---|

(क) त्वं----------------न सम्यक् पठति।
(ख) सा गायति तस्या: माता --------गायति।
(ग) यदि इच्छसि-------------कठिनं परिश्रमं कुरु।
(घ) यथा राजा भवति----------प्रजा अपि भवति।

**प्र.3 मञ्जूषात: समुचितम् अव्ययपदं चित्वा वाक्यानि पूरयत-(1/2x4=2)**

| सर्वदा | पुरा | सम्यक्, | कुत: |
|---|---|---|---|

(क)----------एक: दयालु: राजा आसीत्?
(ख) राजा ----------सत्यं वदति स्म।
(ग) राजा प्रजाया: विषये---------------जानाति स्म।
(घ) प्रजाया: हितं विना -----------सुखम् इति।

**प्र.4 मञ्जूषात: समुचितम् अव्ययपदं चित्वा वाक्यानि पूरयत-(1/2x4=2)**

| कुत: | कदा | किमर्थम् | कति |
|---|---|---|---|

(क) सूर्य:----------------उदेति?
(ख) गंगा--------------प्रभवति?
(ग) स: -----------दु:खी भवति?
(घ) सा प्रात:------------वादने उत्तिष्ठति।

**प्र.5 मञ्जूषात: समुचितम् अव्ययपदं चित्वा वाक्यानि पूरयत-(1/2x4=2)**

| एव | च | कति | अद्य |
|---|---|---|---|

(क) सत्यम्-------------------------जयते।
(ख) राम: श्याम:-----------------------पठत:।
(ग) कक्षायां----------छात्रा: सन्ति?
(घ) ---------- सोमवासर: अस्ति।

**उत्तराणि-**

| | | | | |
|---|---|---|---|---|
| प्र.1 | (क) यदा | (ख) श्व: | (ग) ह्य: | (घ) तदा |
| प्र.2 | (क) किमर्थम् | (ख) अपि | (ग) तर्हि | (घ) तथा |
| प्र.3 | (क) पुरा | (ख) सर्वदा | (ग) सम्यक् | (घ) कुत: |
| प्र.4 | (क) कदा | (ख) कुत: | (ग) किमर्थम् | (घ) कति |
| प्र.5 | (क) एव | (ख) च | (ग) कति | (घ) अद्य |

**************************************************************************************

## विषय: 12.  संख्यावाचिन: शब्दा:

**संस्कृतसंख्यावाचिन: शब्दा: तेषां शब्दरूपाणि च।**

| **पुँल्लिङ्ग :** | **स्त्रीलिङ्ग:** | **नपुंस्कलिङ्ग:** |
|---|---|---|
| 1 एक: | एका | एकम् |
| 2 द्वौ | द्वे | द्वे |
| 3 त्रय: | तिस्र: | त्रीणि |
| 4 चत्वार: | चतस्र: | चत्वारि |

**स्थानवाचकानि/क्रमवाचक संख्यापदानि एकत: विंशति: पर्यन्तम् त्रिषु लिङ्गेषु-**

**(तीनों लिङ्गों में एक से बीस तक स्थान वाचक संख्या पद)**

इस तरह के शब्द रूप तीनों लिंगों में चलते हैं क्योंकि ये विशेषण होते हैं)

**प्रथम: छात्र: (पहला छात्र)**     **द्वितीय: छात्र: (दूसरा छात्र) ध्यातव्य- न कि दो छात्र**

प्रथमा कक्षा (पहली कक्षा)

प्रथमं पुस्तकम् (पहली पुस्तक)

प्रथम: कालांश: (पहला कालांश)

| | | |
|---|---|---|
| प्रथम: | प्रथमा | प्रथमम् |
| द्वितीय: | द्वितीया | द्वितीयम् |
| ततीय: | तृतीया | तृतीयम |
| चतुर्थ: | चतुर्थी | चतुर्थम् |
| पञ्चम: | पञ्चमी | पञ्चमम् |
| षष्ठ: | षष्ठी | षष्ठम् |
| सप्तम: | सप्तमी | सप्तमम् |
| अष्टम: | अष्टमी | अष्टमम् |
| नवम: | नवमी | नवमम् |
| दशम: | दशमी | दशमम् |
| एकादश: | एकादशी | एकादशम् |
| द्वादश: | द्वादशी | द्वादशम् |
| त्रयोदश: | त्रयोदशी | त्रयोदशम् |
| चतुर्दश: | चतुर्दशी | चतुर्दशम् |
| पञ्चदश: | पञ्चदशी | पञ्चदशम् |
| षोडश: | षोडशी | षोडशम् |
| सप्तदश: | सप्तदशी | सप्तदशम् |
| अष्टादश: | अष्टादशी | अष्टादशम् |
| नवदश: | नवदशी | नवदशम् |
| विंश: | विंशी | विंशम् |

**एक (एक) नित्य एकवचनान्त**

| **विभक्ति:** | **पुँल्लिङ्ग:** | **स्त्रीलिङ्ग:** | **नपुंसकलिङ्ग:** |
|---|---|---|---|
| **प्रथमा** | एक: | एका | एकम् |
| **द्वितीया** | एकम् | एकाम् | एकम् |
| **तृतीया** | एकेन | एकया | एकेन |
| **चतुर्थी** | एकस्मै | एकस्यै | एकस्मै |

| | | | |
|---|---|---|---|
| **पञ्चमी** | एकस्मात् | एकस्याः | एकस्मात् |
| **षष्ठी** | एकस्य | एकस्याः | एकस्य |
| **सप्तमी** | एकस्मिन् | एकस्यां | एकस्मिन् |

**द्वि (दो) नित्य द्विवचनान्त**

| **विभक्तिः** | **पुँल्लिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| **प्रथमा** | द्वौ | द्वे | द्वे |
| **द्वितीया** | द्वौ | द्वे | द्वे |
| **तृतीया** | द्वाभ्यां | द्वाभ्यां | द्वाभ्याम् |
| **चतुर्थी** | द्वाभ्यां | द्वाभ्यां | द्वाभ्याम् |
| **पञ्चमी** | द्वाभ्यां | द्वाभ्यां | द्वाभ्याम् |
| **षष्ठी** | द्वयोः | द्वयोः | द्वयोः |
| **सप्तमी** | द्वयोः | द्वयोः | द्वयोः |

**एकतः शतम् पर्यन्तम् संख्यावाचिपदानि-**
**एक से सौ तक की गिनती**

| **संख्या** | **हिन्द्याम्** | **संस्कृते** | **आङ्गभाषायाम्** |
|---|---|---|---|
| 1 | एक | एकः | One |
| 2 | दो | द्वौ | Two |
| 3 | तीन | त्रयः | Three |
| 4 | चार | चत्वारः | Four |
| 5 | पाँच | पञ्च | Five |
| 6 | छः | षट् | Six |
| 7 | सात | सप्त | Seven |
| 8 | आठ | अष्ट | Eight |
| 9 | नौ | नव | Nine |
| 10 | दस | दश | Ten |
| 11 | ग्यारह | एकादशन् | Eleven |
| 12 | बारह | द्वादशन् | Twelve |
| 13 | तेरह | त्रयोदशन् | Thirteen |
| 14 | चौदह | चतुर्दशन् | Fourteen |
| 15 | पन्द्रह | पञ्चदशन् | Fifteen |
| 16 | सोलह | षोडशन् | Sixteen |
| 17 | सत्रह | सप्तदशन् | Seventeen |
| 18 | अठारह | अष्टादशन् | Eighteen |
| 19 | उन्नीस | नवदशन् | Nineteen |
| 20 | बीस | विंशति | Twenty |
| 21 | इक्कीस | एकाविंशति | Twenty One |
| 22 | बाइस | द्वाविंशति | Twenty Two |
| 23 | तेइस | त्रयोविंशति | Twenty Three |
| 24 | चौबीस | चतुर्विंशति | Twenty Four |
| 25 | पच्चीस | पञ्चविंशति | Twenty Five |
| 26 | छब्बीस | षड्विंशति | Twenty Six |
| 27 | सत्ताईस | सप्तविंशति | Twenty Seven |
| 28 | अट् ठाईस | अष्टाविंशति | Twenty Eight |

| | | | |
|---|---|---|---|
| 29 | उनतीस | नवविंशति | Twenty Nine |
| 30 | तीस | त्रिंशत् | Thirty |
| 31 | इकत्तीस | एकत्रिंशत् | Thirty One |
| 32 | बत्तीस | द्वात्रिंशत् | Thirty Two |
| 33 | तेतीस | त्रयत्रिंशत् | Thirty Three |
| 34 | चौतीस | चतुस्त्रिंशत् | Thirty Four |
| 35 | पैंतीस | पञ्चत्रिंशत् | Thirty Five |
| 36 | छत्तीस | षट्त्रिंशत् | Thirty Six |
| 37 | सैंतीस | सप्तत्रिंशत् | Thirty Seven |
| 38 | अड़तीस | अष्टात्रिंशत् | Thirty Eight |
| 39 | उनतालीस | एकोनचत्वारिंशत् | Thirty Nine |
| 40 | चालीस | चत्वारिंशत् | Forty |
| 41 | इकतालीस | एकचत्वारिंशत् | Forty One |
| 42 | बियालीस | द्विचत्वारिंशत् | Forty Two |
| 43 | तेतालीस | त्रिचत्वारिंशत् | Forty Three |
| 44 | चबालीस | चतुश्चत्वारिंशत् | Forty Four |
| 45 | पैंतालीस | पञ्चचत्वारिंशत् | Forty Five |
| 46 | छियालीस | षट्चत्वारिंशत् | Forty Six |
| 47 | सैंतालीस | सप्तचत्वारिंशत् | Forty Seven |
| 48 | अड़तालीस | अष्टचत्वारिंशत् | Forty Eight |
| 49 | उडनचास | एकोनपञ्चाशत् | Forty Nine |
| 50 | पचास | पञ्चाशत् | Fifty |
| 51 | इकक्यावन | एकपञ्चाशत् | Fifty One |
| 52 | बाबन | द्विपञ्चाशत् | Fifty Two |
| 53 | तिरेपन | त्रिपञ्चाशत् | Fifty Three |
| 54 | चौबन | चतुःपञ्चाशत् | Fifty Four |
| 55 | पच्पन | पञ्चपञ्चाशत् | Fifty Five |
| 56 | छप्पन | षट्पञ्चाशत् | Fifty Six |
| 57 | सत्तावन | सप्तपञ्चाशत् | Fifty Seven |
| 58 | अट् ठावन | अष्टपञ्चाशत् | Fifty Eight |
| 59 | उनसठ | एकोनषष्ठिः | Fifty Nine |
| 60 | साठ | षष्ठिः | Sixty |
| 61 | इकसठ | एकषष्ठिः | Sixty One |
| 62 | बासठ | द्विषष्ठिः | Sixty Two |
| 63 | तिरेसठ | त्रिषष्ठिः | Sixty Three |
| 64 | चौसठ | चतुःषष्ठिः | Sixty Four |
| 65 | पैसठ | पञ्चषष्ठिः | Sixty Five |
| 66 | छियासठ | षट्षष्ठिः | Sixty Six |
| 67 | सडसठ | सप्तषष्ठिः | Sixty Seven |
| 68 | अडसठ | अष्टषष्ठिः | Sixty Eight |
| 69 | उनहत्तर | एकोनसप्ततिः | Sixty Nine |
| 70 | सत्तर | सप्ततिः | Seventy |
| 71 | इकहत्तर | एकसप्ततिः | Seventy One |
| 72 | बहत्तर | द्विसप्ततिः | Seventy Two |
| 73 | तिहत्तर | त्रिसप्ततिः | Seventy Three |

| | | | |
|---|---|---|---|
| 74 | चौहत्तर | चतुःसप्ततिः | Seventy Four |
| 75 | पिचत्तर | पञ्चसप्ततिः | Seventy Five |
| 76 | छियत्तर | षट्सप्ततिः | Seventy Six |
| 77 | सतत्तर | सप्तसप्ततिः | Seventy Seven |
| 78 | अठत्तर | अष्टसप्ततिः | Seventy Eight |
| 79 | उनयासी | एकोनाशीतिः | Seventy Nine |
| 80 | अस्सी | अशीतिः | Eighty |
| 81 | इक्यासी | एकाशीतिः | Eighty One |
| 82 | बियासी | द्वशीतिः | Eighty Two |
| 83 | तिरासी | त्र्यशीतिः | Eighty Three |
| 84 | चौरासी | चतुरशीतिः | Eighty Four |
| 85 | पिच्चासी | पञ्चाशीतिः | Eighty Five |
| 86 | छियासी | षडशीतिः | Eighty Six |
| 87 | सत्तासी | सप्ताशीतिः | Eighty Seven |
| 88 | अट् ठासी | अष्टाशीतिः | Eighty Eight |
| 89 | नवासी | एकोननवतिः | Eighty Nine |
| 90 | नब्बे | नवतिः | Ninety |
| 91 | इक्यानवे | एकनवतिः | Ninety One |
| 92 | बानवे | द्विनवतिः | Ninety Two |
| 93 | तिरानवे | त्रिनवतिः | Ninety Three |
| 94 | चौरानवे | चतुर्नवतिः | Ninety Four |
| 95 | पिचानवे | पञ्चनवतिः | Ninety Five |
| 96 | छियानवे | षण्णवतिः | Ninety Six |
| 97 | सतानवे | सप्तनवतिः | Ninety Seven |
| 98 | अठानवे | अष्टनवतिः | Ninety Eight |
| 99 | निन्यानवे | एकोनशतम् | Ninety Nine |
| 100 | एक सौ | शतम् | One hundred |

## अभ्यासकार्यम्

**लघूत्तरात्मकप्रश्ना:**

**ध्यातव्य -एक से चार तक के संख्यावाची शब्दरूपों में केवल प्रथमा विभक्ति के रूप ही तीनों लिङ्गों में परीक्षा के लिए निर्धारित है।**

**प्र.1 अंकान् दृष्ट्वा रिक्तस्थानानि संख्यावाचक-पदै: पूरयत-(1/2x4=2)**

(क) विद्यालये-----------(10) कक्षा: सन्ति।

(ख) -------------(3) बालका: क्रीडन्ति।

(ग) ------------(1) बालिका सस्वरं श्लोकपाठं करोति।

(घ) पुष्पेषु---------------(3) कमलपुष्पाणि सन्ति।

**प्र.2 अंकान् दृष्ट्वा रिक्तस्थानानि संख्यावाचक-पदै: पूरयत-(1/2x4=2)**

(क) पृथिव्यां--------------------(3) रत्नानि भवन्ति।

(ख) सङ्गणकस्य(4)-------------प्रयोगशाला: सन्ति।

(ग) --------------(2) बालकौ उद्यानं सिञ्चत:।

(घ) ---------------(9) संख्यासु श्रेष्ठा संख्या अस्ति।

**प्र.3 अंकान् दृष्ट्वा रिक्तस्थानानि संख्यावाचक-पदै: पूरयत-(1/2x4=2)**

(क)--------(1) महिला किं कर्तुं न शक्नोति।

(ख) देवालयस्य -----------(4) द्वाराणि सन्ति।

(ग) मन्दिरं पुरत:(1)------------वटवृक्ष: अस्ति।

(घ) (1)-------पुस्तकं धृत्वा किं करिष्यति।

**प्र.4 अंकान् दृष्ट्वा रिक्तस्थानानि संख्यावाचक-पदैः पूरयत-(1/2x4=2)**

(क) शरीरे---------------(2) नेत्रे स्तः।

(ख) शरीरे----------------(2) पादौ भवतः।

(ग) शरीरे------------------(1) मुखं भवति।

(घ) अस्माकं ध्वजे------------(3) वर्णाः सन्ति।

**प्र. 5 अंकान् दृष्ट्वा रिक्तस्थानानि संख्यावाचक-पदैः पूरयत-(1/2x4=2)**

(क) एकस्मिन् वर्षे (12)----------------------भवन्ति।

(ख) लता(4)-------------------------आम्राणि खादति।

(ग) (1)----------------शिक्षिका संस्कृतं पाठयति।

(घ) (3)-----------------शिक्षकाः लिखन्ति।

---

**उत्तराणि**

| | | | |
|---|---|---|---|
| प्र.1 (क) दश | (ख) तिस्रः | (ग) एका | (घ) त्रीणि |
| प्र.2 (क)त्रीणि | (ख)चतस्रः | (ग) द्वौ | (घ) नव |
| प्र.3 (क) एका | (ख)चत्वारि | (ग) एकः | (घ) एकम् |
| प्र.4 (क)द्वे | (ख)द्वौ | (ग) एकं | (घ) त्रयः |
| प्र.5 (क) द्वादश | (ख) चत्वारि | (ग)एका | (घ) त्रयः |

*****************************************************************************************

---

# घ खण्डः

# पठितावबोधनम्

## 'घ' खण्डः पठित-अवबोधनम्(30)

## विषयः-13 पठितगद्यांशः

पठितगद्यांश के उत्तर लिखने हेतु कुछ नियम-

(1) **दिए गए गद्यांश को दो-तीन बार ध्यानपूर्वक पढ़ना चाहिए।**

(ii) इस समय जिन प्रश्नों के उत्तर मिल जाएँ, उन्हें रेखांकित कर लेना चाहिए।

(iii) अब बचे हुए एक-एक प्रश्न का उत्तर सावधानीपूर्वक खोजना चाहिए।

(iv) प्रश्नों के उत्तर सदैव शुद्ध भाषा में लिखना चाहिए।

परीक्षा की दृष्टि से निम्नलिखित गद्यांश पस्तुत हैं-

अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

(1) आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः। एकदा यदा स तरुच्छायोपविष्ट आसीत्। तदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्। स च कुद्धस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका भस्मसाद् अभवत् । ततश्च स मुनिः तपः प्रभावाद् अहङ्कारम् उपगतः ।

प्रश्नाः -1.

I एकपदेन उत्तरत- (एक शब्द में उत्तर दीजिए।

(i) मुनेः दृष्टमात्रेव का भस्मसाद् अभूत्?

(ii) मुनेः नाम किं आसीत्?II.

II पूर्णवाक्येन उत्तरत- (पूर्णवाक्य में उत्तर दीजिए।

तपः प्रभावात् मुनिः कीदृशः अभवत् ?

III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत-

(1)'उदसृजत्' इति क्रियापदस्य कर्मपदं किम् ?

(क ) एका (ख) विष्ठाम् (ग) बलाका (घ) उपरि

(ii) 'तां' इति सर्वनामपदस्य स्थाने सज्ञापदं किं भविष्यति ?

(क) बलाकाः ख ) बलाका ग) बलाकाम् घ) बलाकम्

उत्तराणि- (i) बलाका (ii) महातपा ।

॥ तपः प्रभावाद् मुनिः अहङ्कारी अभवत्।

III (1)(ख) विष्ठाम् (2) बलाकाम्

(2) एकदा अयं मुनिः क्वापि नगरे एकं ब्राह्मणगृहम् प्राप्य तद्गृहिणीं भिक्षामयाचत। सा पतिव्रता गृहिणी तमववत् – "प्रतीक्षस्व क्षणं, यावद् भर्तुः परिचर्या समापये" इति। एतत् श्रुत्वा स मुनिः तां कोपवृष्ट्या दृष्टवान्। सा विहस्य अभाषत- "मुने ! न अहं बलाकेति"। तत् आकर्ण्य विस्मितः मुनिः "एतत् कथमिव ज्ञातमनया" इति चिन्तयन् तत्र उपाविशत्।

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत् – "कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।"

प्रश्नाः –एकपदेन उत्तरत-

1) मुनिः कां कोपदृष्ट्या दृष्टवान्?

2) गृहिणी कस्य परिचर्यां करोति स्म?

पूर्णवाक्येन उत्तरत-

1)मुनिः किं चिन्तयन् तत्र उपाविशत

III. शुद्धम् उत्तरं चित्वा लिखत-

1)'अपश्यत्' इत्यर्थे किं क्रियापदम् अत्र प्रयुक्तम् ?

अ) प्रतीक्षस्व (ब) दृष्टवान् (स) आगता (द) उपाविशत्

2) बद्धाञ्जलिः' इति कस्य पदस्य विशेषणपदम्?

अ) भर्तुः (ब) च (स) ताम् (द) मुनिः

उत्तराणि-1. (i) (गृहिणीं) ii) भर्तुः

II. गृहिण्या कथं बलाकावृत्तान्तं ज्ञातं इति चिन्तयन् मुनिः तत्र उपाविशत्।

III. (ब) दृष्टवान् (द) मुनिः

(3) ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत् – "कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।" साऽवदत् – "मुने! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् पृच्छ । ततस्ते श्रेयो भविष्यति त्वं च निरहङ्कारः भविष्यसि इति"। एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां प्रणम्य तद्गृहाद् निरगच्छत् ।

एकपदेन उत्तरत-

(i) साध्वी कस्य शुश्रूषां कृत्वा मुनेः अन्तिकम् आगता?

(ii) (ii) कीदृशः मुनिः तां पतिव्रताम् अवदत् ?

(iii) II. पूर्णवाक्येन उत्तरत-

बद्धाञ्जलिः मुनिः तां पतिव्रतां किम् अवदत् ?

III. उचितम् उत्तरं चित्वा लिखत-

(1) 'कल्याणः' इति पदस्य कृते अत्र किं पदं प्रयुक्तम् ?

अ) साध्वी (ब) भर्तुः (स) अभिहितः (द) श्रेयो

2) 'बलाकावृत्तान्तो' इति पदस्य विशेषणपदं अत्र किं प्रयुक्तम् ?

(अ) मुनिः (ब ) अभिहितः स) अनन्य गोचरः (द) गृहीता अतिथि सत्कार

उत्तराणि- 1) भर्तुः (2) बद्धाञ्जलिः

2) बद्धाञ्जलिः मुनिः तां पतिव्रताम् अवदत् यत् अनन्यगोचरो बलाकावृत्तान्तः कथम् अनया ज्ञात इति।

1) श्रेयो

2) (स) अनन्यगोचरः

(4) अन्येद्युः सः मुनिः समन्विष्य तं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत – "ब्रह्मन् ! किं पतिव्रतया तया इह त्वं प्रेषितः "? तत् आकर्ण्य स मुनिर्विस्मितः तं धर्मव्याधम् अवदत् – "भद्र ! मांसविक्रयिणः ते कथम् ईदृशं विज्ञानम्"? धर्मव्याधः अवदत् – "ब्रह्मन् ! अहं मातापित्रोर्भक्तः । तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि । शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां च मृगादीनां मांसानि स्वधर्म इति मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया। हे मुने ! ज्ञानविघ्नोऽहङ्कारः । अतः स्वधर्मं चर, येन आशु परं श्रेयः अवाप्स्यसि ।"

प्रश्नाः- 1)एकपदेन उत्तरत-

(एक शब्द में उत्तर दीजिए।

1)धर्मव्याधः कयोः भक्तः आसीत् ?

2)धर्मव्याधः मृगादीनाम् मांसानि किमर्थम् विक्रीणाति स्म?

II. पूर्णवाक्येन उत्तरत-(पूर्णवाक्य में उत्तर दीजिए।

ज्ञाने विघ्नः कः अस्ति?

III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत-

1)'मृगादीनाम्' इति पदस्य विशेषणपदं किम्?

क) अन्यहतानाम् ख ) मांसानि (ग) स्वधर्मम घ ) विज्ञानम्

'उपागच्छत्' इति क्रियापदस्य कर्तृपदं किम् ?

1)सः मुनिः ख) तम् (ग ) धर्मव्यांध (घ ) अन्येद्यु :

उतराणि - (i) मातापित्रोः (ii) वृत्यर्थम्। II. ज्ञाने विघ्नः अहङ्कारः अस्ति।

III. (i) (क) अन्यहतानाम् । (क) सः मुनिः।

(5) धर्मव्याधः अवदत् भोजयित्वा भोजनं स्वीकरोमि । शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां मृगादीनां "ब्रह्मन् ! अहं मातापित्रोर्भक्तः। तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, मांसानि स्वधर्म मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया।

प्रश्नाः –एकपदेन उत्तरत-

1) कौ मम परायणम् स्तः ?

2) धर्मव्याधः पितरौ किं कृत्वा भोजनं स्वीकरोति I. एकपदेन उत्तरत-
1) कौ मम परायणम् स्तः ?
2) धर्मव्याधः पितरौ किं कृत्वा भोजनं स्वीकरोति ?
II. पूर्णवाक्येन उत्तरत-
धर्मव्याधः कयोः भक्तः आसीत्?
III. भाषिककार्यम् –
(i) 'स्नापयित्वा स्नामि ..........................................
“”।‘ इत्यत्र 'स्नामि' इति क्रिया-पदस्य गद्यांशे किं कर्तृपदं प्रयुक्तम्?
1)अहम् 2)धर्मव्याधः 3) मृगः 4) तौ
2)'ज्ञात्वा' इत्यर्थे गद्यांशे किम् पदं प्रयुक्तम्?
1) ते 2)हतानाम् 3) मत्वा 4) वृत्यर्थम्
उत्तराणि-1) मातापिता (2) भोजयित्वा
2) धर्मव्याध : मातापित्रो भक्तः आसीत्।
3) (क) अहम् (ख) मत्वा

(6) ततश्च धर्मव्याधेन एवम् अनुशिष्टः स मुनिः तद्गृहं गत्वा धर्मव्याधस्य च सर्वं क्रियाविधिम् अवलोक्य परितुष्टः वनं गतवान् अवाप्तवान् च तदुपदेशात् सिद्धिम्। उक्तञ्च –कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः।
प्रश्नाः- 1)एकपदेन उत्तरत- (एक शब्द में उत्तर दीजिए।
(1) जनकादयः केन ससिद्धिम् प्राप्नुवन् ?
(2)परितुष्टः मुनिः कुत्र गतवान्?
II. पूर्णवाक्येन उत्तरत-
(पूर्णवाक्य में उत्तर दीजिए।
मुनिः कस्य उपदेशात् ज्ञानं अवाप्तवान् ?
III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत-
1) 'दृष्ट्वा' इत्यर्थे किं पदं प्रयुक्तम् ?
1) उक्तम् 2) अवलोक्य 3) दृष्ट्वा 4) वीक्ष्य
2) 'गतवान्' इति क्रियापदस्य कर्तृपदं किम् ?
1) ततश्च 2) धर्मव्याधः 3) सः मुनिः 4) सर्वं :
उत्तराणि- (1) कर्मणा (ii) वनम्।
III. मुनिः धर्मव्याधस्य उपदेशात् ज्ञानं अवाप्तवान् ?
1) अवलोक्य।
2) सः मुनिः
प्रश्न निर्माणम्
**************************************************************************************

## विषय-14, पठितपद्यांश:

पठितपद्यांश के उत्तर लिखने हेतु कुछ नियम-

(1) **दिए गए पद्यांश को दो-तीन बार ध्यानपूर्वक पढ़ना चाहिए।**

(ii) इस समय जिन प्रश्नों के उत्तर मिल जाएँ, उन्हें रेखांकित कर लेना चाहिए।

(iii) अब बचे हुए एक-एक प्रश्न का उत्तर सावधानीपूर्वक खोजना चाहिए।

(iv) प्रश्नों के उत्तर सदैव शुद्ध भाषा में लिखना चाहिए।

**अहो। एषां वरं जन्म सर्वप्रण्युपजीवनम्।**
**धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ।।**

**I एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।**

1) वृक्षा: छायां कस्य कुर्वन्ति?
2) वृक्षा: स्वयं कुत्र तिष्ठन्ति?
3) केषां जन्म वरम्?

**II. पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।**

(i) के धन्याः? कस्मात् कारणात् च?

(i) वृक्षाः परार्थाय किं -किं कुर्वन्ति?

(iii) अर्थिनः केभ्यः निराशा: न यान्ति?

**III. निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।**

i) महीरुहा: पदस्य अर्थम् अस्ति?

(ii) श्लोके 'कुर्वन्ति' क्रियापदस्य कर्तृपदं किमू?

(iii)छायायां पदस्य श्लोके विपर्ययः कः?

**उत्तराणि**

1. (i) अन्यस्य (i1) आतपे (iii) वृक्षाणाम्

II. **पूर्णवाक्येन उत्तरत।**

(i) महीरुहा: धन्या:, यतः तेभ्य; अर्थिनः निराशाः न या
(ii) पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभि:।
(iii) अर्थिनः महीरूहेभ्य: निराशा: न यान्ति

**III. निर्देशानुसारम् उत्तरत।**

i) वृक्षा: ii) वृक्षा: iii) आतपे

**पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभि:।**
**गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते।।**
**आम्र ! यद्यपि गता दिवसास्ते पुष्यसौरभफलप्रचुरा ये।**
**हन्त| सम्प्रति तथापि जनानां छाययैव दलयस्यतितापम्।।**

1. **एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)**

(i) वृक्षः कान् वितन्वते?

(ii) प्रथम -पङ्क्तौ कति वस्तूनां वर्णनं वर्तते?

(ii) आम्रवृक्ष: किं दलयसि?

(iv) कस्य दिवसाः गता?

**पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।**

(i) वृक्षाः कै: जनानां कामान् वितन्वते?

(ii) आम्रवृक्षा: कदा पुष्पसौरभफल प्रचुराः भवन्ति?
(iii) कस्य छाया अतितापम् दलयति?

**II. निर्देशानुसारम् उत्तरत। (निर्देशनुसार उत्तर दीजिए।**

(i) 'पुष्पसौरभफलप्रचुरा:' इति विशेषणस्य विशेष्य: क:?
(ii) 'काष्ठै:' पदस्य पर्यायः वर्तते?
(iii) श्लोके 'सत्त्वभर:' इति कर्तृपदस्य क्रियापदं किम्?

**उत्तराणि**

**एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।)**

(i) कामान्
(ii) सप्त
(iii) अतितापम्
(iv) आम्रस्य

**पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।**

(i) वृक्ष: पत्र-पुष्प-फलच्छाया-मूल-व्कलदारुभिः गन्ध:निर्यास- भस्मास्थितोक्मै: जनानां कांमान् वितन्वते।
(ii) बसन्त ग्रीष्म वर्षासु ऋतुषु आम्रवृक्षा:: पुष्पसौरभ फलप्रचुरा: भवन्ति।
(iii) वृक्षाणाम् छाययैव दलस्य अति तापम् हरति।

**निर्देशानुसारम् उत्तरत। (निर्देशनुसार उत्तर दीजिए।**

(i) दिवसाः
(ii) दारुभिः
(iii) आश्रितम्

**विन्ध्यसहाद्रिनीलाद्रेमालान्विर्तशुप्रहैमाद्रिहासप्रभापूरितम्।**
**अर्बुदारावलीश्रणिसम्पूजितम्भूतले भाति मेऽनारतं भारतम्।**

I. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।
(i) विन्ध्य सहयाद्रि मालान्वित: कः अस्ति?
(ii) अर्बुदारावली श्रेणी कः सम्पूजितम्?
(iii) भारतं कथ भाति?

II. पूर्णवाक्येन उत्तरत1(पूर्ण वाक्य में उत्तर दीजिए।
(i) भारतः कीदृशी मालान्वित: अस्ति?
(ii) भारत: कया श्रेण्या सम्पूजितम् अस्ति?
(iii) भारत: भूतले कीदूशं भाति?

III निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।
i) मेऽनारतम् इत्यस्मिन् पदे सन्धि-विच्छेदं कः अस्ति?
(ii) भूतले अस्मिन् पदे विभक्ति: का?
(iii) सम्पूजितम् इत्यत्र क: उपसर्ग:?

**उत्तराणि**

i भारत: (ii) भारत: (iii) अनारतं
II. (i) भारत: विन्ध्य सह्याद्रि मालान्वितं अस्ति।
(i) भारतः अर्बुंदारावली श्रेष्या सम्पूजितम् अस्ति।
(ii) (ii) भारत: भूतले अनारतं भाति।
(iii) III., (i) मे + अनारतम् (ii) सप्तमी (iii) सम्

**वेदभाभासितं सत्कलालालितंरम्यसङ्गीतसाहित्यसौहित्यभूः|**
**भारतीवल्लकीझङ्कृतैः झङ्कृतम् भूतले भाति मेऽनारतं भारतम्।।**

**. एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।**

(i) भारत भूमि: कैः भासितम?

(ii) भारत भूमि कया लालितम्?

(iii) रम्या सङ्गीत साहित्यभू का अस्ति?

**पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।**

i) भारत भू कीद्शी: अस्ति?

ii) भारत भूमिः काभि: शोभितम् अस्ति?

iii) कस्या वल्लकी झङ्कृतम् अस्ति?

**निर्देशानुसारम् उत्तरत। (निर्देशानुसार उत्तर दीजिए।**

(i) भारतीवल्लकी इत्यस्मिन् पदे कः समासः अस्ति?

(ii) झङ्कृतै: इत्यस्मिन्-पदे का विभक्ति:?

(iii) भाति इत्यस्मिन् पदे का धातुरस्ति?

उत्तराणि

(i) वेदभा

(ii) सत्कलया

(iii) भारत भूमि

(i) रम्यं सङ्गीत साहित्यस्यसंवर्धन स्थली अस्ति।

(ii) भारत भूमि: श्रेष्ठ: कलाभि: शोभितम् अस्ति।

iii) भारत्या वल्लकी झङ्कृतम् अस्ति

III (i) षष्ठी तत्पुरुष

(ii) तृतीया

(iii) भा

**अधोलिखितं श्लोकं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि यथानिर्देशं लिख्यन्ताम् –**

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥ 1 ॥

प्रश्नाः –**एकपदेन उत्तरत-**

1.के अन्यस्य छायां कुर्वन्ति ?

2. वृक्षा : स्वयं कुत्र तिष्ठन्ति?

**पूर्णवाक्येन उत्तरत-**

वृक्षाः किमर्थं फलन्ति?

**उचितम् उत्तरं चित्वा लिखत-**

'कुर्वन्ति' इति क्रियापदस्य कर्तृपदं किम्?सत्पुरुषाः (ब) परार्थाय
(स) स्वयम् (द) वृक्षाः

(i) 'छायायाम्' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?
अ ) आतपे (ब) फलानि स) इवम द परार्थाय

उतराणि –

1) वृक्षा : 2) आतपे

2 . वृक्षा : परार्थाय फलन्ति

3. 1)वृक्षा 2)आतपे

**अहो ! एषां वरं जन्म सर्वप्राण्युपजीवनम्।**
**धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ॥ 2 ॥**

1. **एकपदेन उत्तरत-**

(i) के धन्याः सन्ति?

(ii) वृक्षाणां किं धन्यम् ?

II. **पूर्णवाक्येन उत्तरत-**

वृक्षाणां जन्म किमर्थं धन्यम्?

III. **शुद्धम् अर्थ चित्वा लिखत-**

(i) 'यान्ति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) धन्याः (ब) महीरुहाः स) निराशा: द ) अर्थिन :

(ii) 'एषाम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(अ) जन्मने ब) सर्वप्राण्युपजीविने स ) महीरुहेभ्यः द )अर्थिभ्यः

**उत्तराणि**-I. (1) महीरूहा: 2) जीवन

II. वृक्षाणाम् जीवनं धन्यं यतः अर्थिनः तेभ्यः निराशाः न यान्ति।

1) अर्थिनः 2) महीरुहेभ्यः

**ग) पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभिः ।**

**गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते ॥ ३ ॥**

प्रश्नाः –**एकपदेन उत्तरत-**।

1) वृक्षाः कान् वितन्वते?

2 ) अस्मभ्यम् पत्रपुष्पफलादीनि कः ददाति?

**पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए।**

वृक्षाः जनेभ्यो किं-किं यच्छन्ति?

**निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत-**

(i) 'सुमन' इत्यर्थे पद्यांशे किं पदं प्रयुक्तम् ?

क) पत्र ख ) फल ( ग) मूल घ ) पुष्पं

(i) **अस्मिन् श्लोके क्रियापदं किम् अस्ति?**

(क) छाया (ख ) तन्वते (ग) वितन्वते (घ) निर्मास

उत्तराणि –1) कामान् (2) वृक्षाः।

II वृक्षाः जनेभ्यो पत्रं, पुष्पं, फलं, छाया, मूलं वल्कलं दारू, गन्ध, निर्यासः, भस्म, अस्थिः तोक्य च यच्छन्ति।

III) घ ) पुष्पं (ग) वितन्वते

**ग) आम्र ! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये।**

**हन्त ! सम्प्रति तथापि जनानां छाययैव दलयस्यतितापम् ॥ 4 ॥**

प्रश्नाः- **एकपदेन उत्तरत-**

अयं श्लोकः कं वृक्षं सम्बोधयति ?

आम्रवृक्षः जनानाम् अतितापं कया दलयति ?

**पूर्णवाक्येन उत्तरत-** आम्रस्य कीदृशाः दिवसाः गताः?

**यथानिर्देशम् उत्तरत-**

(i) 'इदानीम्' इत्यर्थे किम् अव्ययपदं श्लोके प्रयुक्तम् ?

(क) यद्यपि (ख) सम्प्रति (ग) एव (घ) तथापि

(ii) 'दलयसि' इति क्रियापदस्य कर्तृपदं किम् ?

(क) हन्त ! (ख) आम्र!/ त्वम् (ग) तथापि (घ) अतिताप

**उत्तराणि-**

I (i) आम्रवृक्षं (ii) छायया

II. आम्रस्य पुष्पसौरभफलप्रचुराः दिवसाः गताः।

III (क) सम्प्रति (ख) त्वम्

**घ) मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गैः ।**

**नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात् ॥ 5 ॥**

**एकपदेन उत्तरत-**

1)चन्दनपादपस्य शाखा कैः आश्रिता?

2) चन्दनपादपस्य शिखरं कैः आश्रितम् ?

**पूर्णवाक्येन उत्तरत-** कस्य भागाः कैः समन्तात् आश्रिताः?

**निर्देशानुसारम् उत्तरत-**

वानरैः इत्यर्थे किं पदमत्र प्रयुक्तम् ?

अ)भुजङ्गः

(ब) प्लवङ्गः

(स) शृङ्गैः

(द) सत्व भरैः

'अस्ति' इत्यस्य कर्तृपदम् किम् ?

तत्

(ब) यत्

स)आश्रित

द) मूलम

उत्तराणि-

(i) विहङ्गैः २ प्लवङ्गैः

चन्दनपादपस्य भागाः सत्त्वभरैः आश्रिताः।

(i) (ब) प्लवङ्गैः २) तत्

**(च) निम्ब ! त्वदीयकटुता यदि दाहहन्त्री,**

**गायन्तु मूढमनुजास्तव दोषगाथाः । तप्तास्त एव तपनोपमपित्ततापैः गास्यन्ति मित्रवर! तावकगीतकानि ॥ 6 ॥**

**प्रश्नाः –एकपदेन उत्तरत-**

**१.** पित्ततापैः तप्ताः जनाः निम्बस्य कानि गास्यन्ति?

२. निम्बस्य कटुता कीदृशी भवति ?

**पूर्णवाक्येन उत्तरत-** निम्बस्य दोषगाथाः के गायन्तु ?

**प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा निर्देशानुसारं लिखत** – (i) 'तव दोषगाथाः' – अत्र 'तव' इति सर्वनामपदं कस्मै प्रयुक्तम्?

दोषगाथायै

(ब) तापाय

(स) निम्बाय

(द) मूढमनुजाय

'मधुरता' इति पदस्य श्लोके किं विलोमपदं प्रयुक्तम्?

(अ) दाहहन्त्री

(ब) कटुता

(स) दोषगाथा

(द) तप्ताः

उत्तराणि-

गीतकानि

दाहहन्त्री

निम्बस्य दोषगाथाः मूढमनुजाः गायन्तु।

निम्बाय

********************************************************************************************

## विषयः -15, पठितनाट्यांश

पठितनाट्यांश के उत्तर लिखने हेतु कुछ नियम-

(1) **दिए गए पद्यांश को दो-तीन बार ध्यानपूर्वक पढ़ना चाहिए।**

(ii) इस समय जिन प्रश्नों के उत्तर मिल जाएँ, उन्हें रेखांकित कर लेना चाहिए।

(iii) अब बचे हुए एक-एक प्रश्न का उत्तर सावधानीपूर्वक खोजना चाहिए।

(iv) प्रश्नों के उत्तर सदैव शुद्ध भाषा में लिखना चाहिए।

**नाट्यांशान् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत।**

**नाट्यांश (1)**

मेवाडाधिपतिः महाराणाप्रतापः अरण्ये कतिपयैः विश्वासपात्रैः भटैः सह सङ्कटापनन्ने काले विचारमग्नः शिलायाम् उपविष्टः अस्ति । स्वदेशस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि । हन्त । वराकस्य पार्श्वे सेनायाः भोजनसामग्र्याः अपि च अभावः विद्यते। अधुना तु स स्वकीयैः प्राणैरेव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति ।)

प्रतापः - "धिङ् माम् अधन्यम्, योऽहं मातृभूमिं रक्षितुम् असमर्थः । अलं मम एतेन जीवितेन । (दीर्घं निश्वसिति) ( यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः )

राजपुत्रः- (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम्।

प्रतापः –(समाश्वस्य) अयि भ्रातः । कथं जयघोषं कृत्वां मां लजयसे ?

राजपुत्रः– देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राच्यत्राणाय? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते ननु भवान्।

प्रतापः –कुतस्तावद् विजयः ! स्वदेशमेव त्यक्तुं तत्परोऽहम्।

भटः –(अञ्जलिं बद्ध्वा) महाराज ! नैवं तावत् । स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः।

प्रतापः – एवं न वक्तव्यम्। कृतज्ञोऽस्मि भवताम् अहम्। वीरैः धीरैः बहु उपकृतं देशस्य । स्वदेशे एव तिष्ठद्भिः

भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नः समाधेयः ।

सर्वे भटाः– देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्यामः।

प्रतापः– यथा रोचते भवद्भ्यः । प्रदेशोऽयम् अस्माभिः त्याज्यः एव । ( निस्सरति प्रतापः, भटाः चापि तमनुचरन्ति) ।

**प्रश्नाः**

। - एकपदेन उत्तरत

क) कृतज्ञोऽस्मि भवतां " इति कः कथयति?

ख) प्रतापः कुत्र विचारमग्नः तिष्ठति?

ग) भटाः केषां अनुगन्तारः सन्ति?

घ) कैः उपकृतं देशस्य?

ङ) कः विजयतां महाराजः' एवं कथयति?

।।- पूर्णवाक्येन उत्तरत -

क) प्रतापः अन्ते किं कथयति?

ख) राजपुत्रः किं वदति?

।।।- भाषिकं कार्यम्–

क) ' परतन्त्रतायै 'पदस्य नाट्यांशे विपरीतपदं किम्?

ख) "विजेष्यते ननु भवान्" ।"भवान् " इति सर्वनामपदं कस्मै प्रयुक्तम्?

ग) ' वीक्ष्य" इत्यर्थे अत्र किं पदं प्रयुक्तम्

**नाट्यांश। (2)**

तमेवं स्वतन्त्रताप्राप्तिं प्रति निराशं दृष्ट्वा अटवीवासिनो भिल्लाः दुःखीयन्ति )

प्रथमः भिल्लः– हा धिक्! कीदृशः समय आगतः! देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः । द्वितीयः भिल्लः – न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम् ? हा निष्ठुर दैव ! देशभक्ते तु दयस्व ।(निस्सरति प्रतापः, भटाः चापि तमनुचरन्ति)। तमेवं स्वतन्त्रताप्राप्तिं प्रति निराशं दृष्ट्वा अटवीवासिनो भिल्लाः दुःखीयन्ति )

प्रथमः भिल्लः – हा धिक्! कीदृशः समय आगतः! देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः । द्वितीयः भिल्लः– न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम् ? हा निष्ठुर दैव ! देशभक्ते तु दयस्व ।

तृतीयः भिल्लः – वराकोऽयं जीवनसामग्रीयुद्धसामग्र्योः अभावेन खिद्यते । परमेश्वर ! दयस्व ! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः?

( सर्वे भिल्लाः विलपन्ति )

एकः सैनिकः - हा दैव! कथं देशधर्मौ प्रति निष्ठुरः संजातोऽसि ? (प्रतापं प्रति) महाराज ! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम्।

सर्वे सैनिकाः– परतन्त्र देशे जीवनं नरकायते। न शक्नुमः प्राणान् धारयितुम्।

सर्वे आत्मानं हन्तुमुद्यताः ) ( एतद् दृश्यं दृष्ट्वा तत्रत्याः भिल्लाः अपि मरणाय तत्पराः भवन्ति )

**प्रश्नाः-**

I- एकपदेन उत्तरत-

क) के मरणाय तत्पराः भवन्ति?

ख) "देशभक्ते तु दयस्व" इति कः कथयति?

ग) सैनिकः स्वचक्षुषा किं न द्रष्टुं शक्नोति?

घ) परतन्त्रे देशे जीवनं कीदृशं जायते?

ङ) भिल्लाः कुत्र निवसन्ति?

II– पूर्णवाक्येन उत्तरत–

क) तृतीयः भिल्लः किं वदति?

ख) के किमर्थं च दुखीयन्ति?

III- भाषिक- कार्यम्–

क) 'प्रसीदन्ति' पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत।

ख) "भवन्ति" इति क्रियापदस्य कर्तृपदं किम्?

ग) 'द्रष्टुं' पदे कः प्रत्ययः?

**नाट्यांश। (3)**

प्रतापः– (सैनिकान् भिल्लान् च आत्मघातं कुर्वतः दृष्ट्वा) स्थीयताम्, स्थीयताम्। आत्मघातिनः जनाः तु असूर्यान् लोकान् व्रजन्ति। वीरगत्या मरणमेव कल्याणप्रदं भवति। धैर्येण स्वतन्त्रतायाः उपायाः चिन्तनीयाः।

(नेपथ्ये ) विरम्यतां प्रभो! विरम्यताम्।

प्रतापः— श्रुतपूर्व इव स्वरः। (सैनिकं प्रति) वृक्षम् आरुह्य दृश्यतां कः एष शब्दापयति ?

सैनिकः – (निपुणं निरीक्ष्य) महाराज! मेवाडमन्त्री भामाशाहः खलु एषः।

प्रतापः – अये भामाशाहः आगतः! कथमस्माकं दौर्भाग्यं भवताऽपि परिज्ञातम्।

( भामाशाहः धनराशिमादाय आयाति )

भामाशाहः — (सप्रणामम्) अन्नदातः ! सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

प्रतापः — ( दीर्घं निःश्वस्य) न क्वापि बन्धो ! गन्तुमपि न शक्यते। धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः।

भामाशाहः — भवतः चिन्तातुरतां परिज्ञाय भग्नमिव मे हदयम्। (धनराशिं निर्दिश्य) इयं सम्पतिः खलु कस्मै प्रयोजनाय ? ईदृशे एव कर्मणि अस्याः उपयोगः श्रेयान्। प्रतापः—- सत्यं वदति भवान्।

भामाशाहः – यद्येवं तर्हि गृह्यताम्। त्रोट्यतां पारतन्त्र्यश्रृङ्खलाः स्वकीयैः लौह बाहुभिः। स्वतन्त्रः क्रियतां स्वदेशः। ( धनराशिं प्रतापचरणयोः अर्पयति )

प्रतापः। - (साश्चर्यम्) किमिदं भवान् करोति ? नाहं दत्तां सम्पत्तिं पुनः आददामि।

भामाशाहः— (सविनयम्) गृह्यतां भगवन्! देशं धर्मं च रक्षितुम्।

प्रतापः – धन्योऽसि मन्त्रिवर्य त्वदीया जननी धन्या। सुकुले जातोऽसि।

I- एकपदेन उत्तरत-

क) प्रतापः आत्मघातं कुर्वतः कान् पश्यति?

ख) 'सत्यं वदति भवान् " एवं कः वदति?

ग) कः धन्यः अस्ति?

घ) ' नाहं दत्तां संपत्तिं पुनः आददामि' इति कः वदति?

ङ) भामाशाहः प्रतापचरणयोः किं अर्पयति।

II - पूर्णवाक्येन उत्तरत-

क) आत्मघातिनः कान् प्रति व्रजन्ति?

ख) प्रतापः किमर्थं पर्याकुलः अस्ति?

III- भाषिक- कार्यम्-

क) ' माता '.इत्यर्थे नाट्यांशे किं पदं आगतम्?

ख) ' परित्यज्य ' अत्र कः प्रत्ययः?

ग) ' शब्दापयति'.इति क्रियापदस्य कर्तृपदं किम्?

**नाट्यांश (4)**

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत् । द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच - हे श्वेतकेतो ! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च ' सर्वश्रेष्ठः अहम्" इति मन्यमानः उद्धतस्वभावः अभवत्। एवम्भूतं पुत्रं दृष्ट्वा पिता उवाच - हे श्वेतकेतो ! कः ते उपाध्यायात् अतिशयः प्राप्तः येन त्वं कुलाननुरूपम् उद्धतः असि ? जानासि किं तत्, येन श्रुतेन अन्यत् अश्रुतम् अपि श्रुतं भवति, अमतं मतम्, अविज्ञातं च विज्ञातं भवति इति। एतद् अद्भुतं प्रश्नं श्रुत्वा पृच्छति - कथम् इति! इत्युक्तः पिता अधोलिखितदृष्टान्तेन तत्त्वज्ञानं प्रतिपादयति-

आरुणिः - श्वेतकेतो ! न्यग्रोधफलम् आहर ।

श्वेतकेतुः - इदं भगवन्

आरुणिः - अत्र किं पश्यसि?

श्वेतकेतुः - अणुतराणि इमानि बीजानि।

आरुणिः - एषु एकं बीजं भिन्धि।

श्वेतकेतुः - भिन्नम्।

आरुणिः - अत्र किं पश्यसि?

श्वेतकेतुः - न किञ्चन भगवन्।

इदं श्रुत्वा पिता पुत्रम् उवाच - हे सौम्य! पश्य अत्र वटबीजे एव महान् स्थूलः शाखादिमान् न्यग्रोधः वटः उत्पन्नः सन् तिष्ठति। एवम् अणिम्नः स्थूलं जगद् उद्भवति । विश्वसिहि, हे सौम्य ! स एव आत्मा। तत् एव सत्। तत् त्वम्

I - एकपदेन उत्तरत-

क) महर्षेः आरुणेः पुत्रः कः ?

ख) अत्र किं पश्यसि' इति कः पृच्छति?

ग) आरुणिः पुत्र् किं आनेतुं कथयति?

घ)-अणिम्नःकिं उद्भवति?

ङ) श्वेतकेतुः कं उपगच्छति?

II- पूर्णवाक्येन उत्तरत–

क) 'न किञ्चन ' इति श्रुत्वा पिता किं उपदिशति?

ख) बीजानि कीदृशानि सन्ति?

ग) श्वेतकेतुः केन उद्धतस्वभावः अभवत्?

III- भाषिक- कार्यम्-

क) 'सूक्ष्मात्' इत्यस्य पर्यायपदं नाट्यांशे किम्?

ख) 'अणुतराणि बीजानि 'अनयोः विशेष्यपदं किम्?

ग) 'अमतम्' पदस्य विलोम पदं चित्वा लिखत ।

**नाट्यांश (5)**

धारानगर्यां भोजराजस्य राजसभा । सर्वे अमात्याः कर्मचारिणः च यथास्थानम् आसनानि अध्यासते ।

(प्रविश्य )

द्वारपालः – जयतु देवः । द्रविडदेशीयः लक्ष्मीधरनामा कश्चिद् विद्वान् देवस्य दर्शनार्थं द्वारदेशम् अध्यास्ते ।

भोजः– सादरं प्रवेशय ।

द्वारपालः — यथा आदिशति देवः । (निष्क्रान्तः)

लक्ष्मीधरः - (द्वारपालेन सह प्रविश्य), राजन्! अभिवादये भवन्तम् । दिनकरदीप्तिरिव भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु । वर्धन्तां विभवाः सौख्यानि च। लसन्तु सम्पदः, विलयं व्रजन्तु च विपदः । प्रतिष्ठां लभतां विद्वद्गणः। सततम् एधतां विद्यासु कलासु च भवदनुरागः ।

श्रूयताम् -"क्षमा दाता गुणग्राही स्वामी पुण्येन लभ्यते। अनुकूलः शुचिर्दक्षः कविर्विद्रान् सुदुर्लभः ॥

भोजः अनुगृहीतोऽस्मि। कुतः समागमनम् अत्रभवताम् ?
लक्ष्मीधरः – राजन्! यत्र जलपूर्णं सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि।
भोजः – ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर। नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एष पण्डितवरः वासयितव्यः।
मन्त्रीः— यथा आज्ञापयति देवः। (निष्क्रम्य पुनः नगरपालेन सह प्रविश्य)
नगरपालः— महाराज! मन्त्रिवरस्य आदेशेन अहं समस्ते नगरे भ्रान्त्वा कमपि निरक्षरं मूर्खं वा जनं न अपश्यम्। कुत्र वासयितव्यः पण्डितवर्यः ?
भोजः-' (क्षणं विचार्य) भो नगरपाल।! त्वं भूयः नगरं याहि। यः नागरिकः काव्यं कर्तुं न जानाति, स निष्कास्यताम्।
प्रश्नाः-
I- एकपदेन उत्तरत-
क) नगरपालः कस्य आदेशेन समस्ते नगरे भ्रमति?
ख) पण्डितस्य नाम किम्?
ग) सर्वे कर्मचारिणः अमात्याः च कुत्र अध्यासते?
II- पूर्णवाक्येन उत्तरत-
क) लक्ष्मीधरः राजानं कं आशीर्वादं यच्छति?
ख) नाट्यांशे अन्तिमे भोजः नगरपालं किं आदिशति?
III- भाषिकं कार्यम्–
क) 'साक्षरं ' पदस्य विलोमपदं किम्?
ख) " जलपूर्णं सरः" अनयोः विशेषणपदं किम्?
ग) 'भ्रान्त्वा' पदे कः प्रत्ययः?

## नाट्यांश (6)

नगरपालः– (तन्तुवायं प्रति) भो किमेतत् करोषि ?
तन्तुवायः– महाशय ! अहं त्रुटितान् तन्तून् संयोजयामि।
नगरपालः— किं पठितोऽसि ?
तन्तुवायः–आम् मया गुरुकुले शिक्षा गृहीता।
नगरपालः — किं काव्यरचनां जानासि ?
तन्तुवायः— पश्यतु एव भवान्। तन्तुसंयोजने व्यग्रोऽहं कथं काव्यं कुर्याम् ?
नगरपालः— तर्हिं त्वया मया सह राजसभां गन्तव्यम्।
तन्तुवायः—-- प्रसीदतु भवान्! तत्र गत्वा किं करिष्यामि। दयस्व, मयि दयस्व। तत्र गमनेन मम कार्यहानिः भविष्यति।
नगरपालः —- नाहं जाने। त्वया गन्तव्यमेव। एष राजदेशः। विसृज कार्यम्। झटिति आगच्छ मया साकम्।
तन्तुवायः– राजादेश इति। गन्तव्यमेव, नास्ति उपायः। चलामि नगरपालक ! चलामि।
प्रश्नाः –
I - एकपदेन उत्तरत-
क) नगरपालः तन्तुवायं कुत्र चलितुं कथयति?
ख) विसृज कार्यम् " इति कस्य आदेशः?
ग) तन्तुवायः कस्मिन् व्यग्रः आसीत्?
II- पूर्णवाक्येन उत्तरत—
क) नगरपालः अन्ते किं चिन्तयति?
ख) तन्तुवायेन कुतः शिक्षा गृहीता?
III- भाषिक-कार्यम्–
क) 'शीघ्रम् ' इति पदस्य समानार्थकपदं नाट्यांशात् चित्वा लिखत।
ख) 'अहं ' इति कर्तृपदस्य क्रियापदं किम्?
ग) 'भविष्यति' पदे कः लकारः?

## **नाट्यांश (7)**

( राजसभा। सर्वे यथापूर्वम् उपविष्टाः। ) नगरपालः— (प्रविश्य) महाराज! अनीतोऽयं कुविन्दः। अयं काव्यं कर्तुं न जानाति।

भोजराजः– (कुविन्दं प्रति) भोः त्वं काव्यं कर्तुं न जानीषे। अतः राजकोषात् धनं गृहीत्वा कवचिदन्यत्र प्रस्थानं कुर्। तव गृहे एष पण्डितवरः सकुटुम्बः स्थास्यति।

तन्तुवायः —- राजन्! राजनियमः तु मया पालनीयः एव तथापि श्रूयतां मम एकं निवेदनम्।

भोजराजः—- त्वरितं ब्रूहि।

तन्तुवायः—-- महाराज! तन्तुवयनं मम व्यवसायः। अहं रात्रिन्दिवं परिश्रम्य अनेन व्यवसायेन जीविकामर्जयामि। काव्यरचनायां महाकवितुल्यः मम अभ्यासः नास्ति तथापि किञ्चित् निवेदयामि। श्रोतुमर्हन्ति भवन्तः -

काव्यं करोमि नहि चारुतरं करोमि
यत्नात् करोमि यदि चारुतरं करोमि।
भूपालमौलिमणिमण्डितपादपीठ
हे साहसाङ्क कवयामि वयामि यामि ॥

भोजः— साधु कुविन्द! साधु! कीदृशी लालित्यपूर्णा पदयोजना ! कवयामि वयामि यामि ' धन्योऽसि त्वम्। अहमपि आत्मानं धन्यं मन्ये, यस्य राज्ये तन्तुवायाः, कुम्भकाराः, अयस्काराः, शिल्पिनः, श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति।

भोजः– ( तन्तुवायं प्रति) भो ! कविवर! गृहाण पुष्कलं स्वर्णमयं पारितोषिकम्। निजम् आवासं च प्रयाहि। (मन्त्रिणं प्रति) पण्डितः लक्ष्मीधरः मम राजभवने वासयितव्यः, यावद् अपरा व्यवस्था न भवति।

(राजा तन्तुवायाय स्वर्णमुद्राः अर्पयति। तन्तुवायः पारितोषिकं प्राप्य प्रसन्नवदनः राजानम् अभिवाद्य निष्क्रामति)

प्रश्नाः—

I - एकपदेन उत्तरत-

क) सर्वे कुत्र यथापूर्वं उपविष्टाः?

ख) भोजः कुविन्दाय कीदृशं पारितोषिकं यच्छति?

ग) पदयोजना कीदृशी अस्ति?

II- पूर्णवाक्येन उत्तरत-

क)- कः काव्यं कर्तुं न जानाति ?

ख) भोजः तन्तुवायं प्रति किं कथयति?

III- भाषिकं कार्यम्-

.क) ‘ तन्तुवायः’ पदस्य पर्यायपदं चित्वा लिखत–।

ख) ‘ललितां काव्यरचनां’ अनयोः विशेषणपदं किम्?

ग) ‘मन्ये’ इत्यस्य क्रियापदस्य कर्तृपदं किम् ?

*****************************************************************************************************

## विषय:-16, प्रश्न निर्माणम्

प्रश्न निर्माणाय सप्त ककाराणां ज्ञानं आवश्यकं I ते च -

सप्तककारा:

किम्  कुत्र  कति  कदा  कुत:  कथं  किमर्थं

इदानीं क्रमश: एतेषां विवरणमत्र दीयते –

- **किम् -**

- छात्रा: किम् शब्दस्य त्रिषु लिंगेषु सर्वाणि रूपाणि अर्थसहितं अवश्यं पठेयु:I
- एतेषां सप्तविभक्तिषु अपि सर्वेषां रूपाणां अध्ययनं करणीयं I
  रूपाणि अध: दीयन्ते I

**किम् – शब्द: पुल्लिङ्गे –**

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | क: | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कै: |
| चतुर्थी | कस्मै | काभ्याम् | केभ्य: |
| पंचमी | कस्मात् | काभ्याम् | केभ्य: |
| षष्ठी | कस्य | कयो: | केषाम् |
| सप्तमी | कस्मिन् | कयो: | केषु |

**किम् – शब्द: स्त्रीलिङ्गे –**

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | का | के | का: |
| द्वितीया | काम् | के | का: |
| तृतीया | कया | काभ्याम् | काभि: |
| चतुर्थी | कस्यै | काभ्याम् | काभ्य: |
| पंचमी | कस्या: | काभ्याम् | काभ्य: |
| षष्ठी | कस्या: | कयो: | कासाम् |
| सप्तमी | कस्याम् | कयो: | कासु |

**किम् – शब्द: नपुंसकलिङ्गे –**

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कै: |
| चतुर्थी | कस्मै | काभ्याम् | केभ्य: |
| पंचमी | कस्मात् | काभ्याम् | केभ्य: |
| षष्ठी | कस्य | कयो: | केषाम् |
| सप्तमी | कस्मिन् | कयो: | केषु |

रेखांकितपदस्य आधारेण एव प्रश्ननिर्माणं करणीयं I सामान्यत: प्रश्ननिर्माणाय प्रथमं रेखांकितपदस्य लिङ्गं विभक्तिं वचनं च दृष्ट्वा तस्य स्थाने तस्मिन् लिङ्गे तस्यां विभक्तौ तस्मिन् वचने च किं शब्दस्य रूपं लेखनीयम् I

यथा –

1. एनं कार्यं दीपक: सम्यगतया करोति I
2. कवि: लेखन्या कवितां लिखति I
3. मोहन: फलं खादति I

क्रमशः उत्तराणि – क: , कया , किम् I

- **कुत्र –**

किमपि वस्तु , स्थानं , व्यक्ति: इत्येतेषां स्थितिं ज्ञातुं कुत्र शब्दस्य प्रयोग: क्रियते I

यथा –

1. सा आपणं गच्छति I
2. रमेश: गृहे अस्ति I

- **कति –**

संख्यात्मकं उत्तरं ज्ञातुं अस्य उपयोग: I यथा –

1. मार्गे चत्वारि भवनानि आसन् I
2. उद्याने पञ्च बालका: सन्ति I

- **कदा –**

कालवाचके प्रश्ने प्रयुज्यते एष: अव्यय: I यथा –

1. त्वं प्रात:काले पठसि I
2. सुरेश: षड् वादने क्रीडति I

- **कुत: -**

कस्यापि गमनागमनयो: स्थानं ज्ञातुं एष: अव्यव: उपयुज्यते I यथा –

1. गंगा हिमालयात् प्रभवति I
2. फलं वृक्षात् पतति I

- **कथं –**

कस्यापि कार्यस्य माध्यमं ज्ञातुं अथवा कार्यस्य निष्पादन स्वरुपं ज्ञातुं एष: अव्यय: प्रयुज्यते I यथा –

1. मृग: तीव्रं धावति I
2. बाल: विद्यालयं यानेन गच्छति I

- **किमर्थं –**

हेतु ज्ञानाय अस्य शब्दस्य प्रयोग: क्रियते I

यथा-

1. लता क्रीडनाय क्रीडाक्षेत्रं गच्छति I
2. विद्यार्थिन: पठनाय विद्यालयं आगच्छन्ति I

- **कीदृश: -**

यदि वाक्ये रेखांकितपदम् अन्यपदस्य विशेषणपदम् अस्ति तर्हि प्रश्ने कीदृश: शब्दस्य प्रयोग: कर्तव्य: I पुल्लिङ्गे-- कीदृश: **,** स्त्रीलिङ्गे – कीदृशी , नपुंसकलिङ्गे – कीदृशं I

**पाठ्य पुस्तक आधारेण केचन अभ्यासा: -**

अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं क्रियताम् –

यथा – **अणिम्न:** स्थूलं जगद् उद्भवति ।

क) कः	ख) कस्मात्	ग) काः	घ) कस्या

उत्तरम् - ( ग) कस्मात्।

(i) **आत्मनः** ज्ञानेन सर्वं ज्ञातं भवति।

क) कः ख) कस्य ग) केन घ) के

(ii) अणिम्नः **स्थूलं** जगद् उद्भवति।

क) कीदृशं ख) किम् ग) कम् घ) काम्

**(iii)** **महर्षेः आरुणेः** पुत्रः श्वेतकेतुः आसीत्।

क) कस्या ख) कस्य ग) कस्याः घ) कस्यै

**(iv)** **वटबीजे** न्यग्रोधः वटः उत्पन्नः सन् तिष्ठति।

क) के ख) काः ग) का घ) कस्मिन्

**(v)** **श्वेतकेतुः** न्यग्रोधस्य फलं आहरति।

क) के ख) काः ग) कः घ) कस्मिन्

(vi) श्वेतकेतुः **वेदान्** अधीत्य आगच्छत्।

क) के ख) कान् ग) का घ) कस्मिन्

I अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं क्रियताम् –

क) -माधवः (उज्जयिन्याम्)अवसत्|

1- कुत्र। 2- कयाम् 3- कासाम्। 4- कस्मिन्

ख) ब्राह्मणी( शिशोः) रक्षार्थं ब्राह्मणंनियोज्य स्नातुं गता

1- केन 2- केषु 3- कस्य 4-काभ्याम्।

ग ) ब्राह्मणः (दारिद्र्यात्) अचिन्तयत्|

1- कात् 2- कया 3- केन। 4-कस्मात्

घ) यदि कार्य क्षिप्रं न क्रियते तदा कालः तस्य (रसम् )पिबति|

1- कम्। 2– किम् 3- केन। 4-कः

(ङ) स ब्राह्मणः (नकुलं) बालरक्षायां व्यवस्थापयति।

1– कस्य 2– कम् 3– काम्। 4– कया

च ) नकुलः समीपम् (आगच्छन्तं) कृष्णसर्पम् अमारयत्||

1- कम् 2—काम्। 3– कासाम्। 4– कीदृशम्

II अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं क्रियताम् –

क) (मूढैः) पाषाणखण्डेषु रत्नसंज्ञा विधीयते|

1— काभिः 2– कैः 3— केषु। 4–कथम्

ख) (सद्भिः) लीलया प्रोक्तं शिलालिखितमक्षरम्।

1— कया। 2— केन 3– काभिः। 4–कैः

(ग) मथ्यमानात् (काष्ठात् )अग्निः जायते।

1– कात्। 2– कस्मात्। 3– कया। 4–कस्याः

(घ) *(वैनतेयः)अगच्छन् एकं पदं न गच्छति।

1– का 2– कः 3– कं 4–काः

III- अधोलिखितेषु वाक्येषु रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं क्रियताम् –

क) विचारमग्नः महाराणाप्रतापः (शिलायाम्) उपविष्टः आसीत्|

1— कायाम्। 2– कस्याम्। 3– कया। 4– के

ख) सर्वे भटाः (देशरक्षायै) बद्धपरिकराः सन्ति।

1– किमर्थम्। 2– कायै। 3– कानाम 4– कस्याः

ग ) भिल्लाः [मातृभूमेः) दुर्दशां नैव द्रष्टं शक्नुवन्ति।

1- कयाः।   2– केः   3– कस्य।   4–कस्याः

घ) (भामाशाहः) धनराशिम् आदाय आगच्छति।
1– काः।   2– केन।   3– का।   4–कः

(ङ) परतन्त्र देशे (जीवनं ) नरकायते।
1– कम्।   2— काम्।   3— किम्।   4–कथम्

च) वीरगत्या मरणमेव (कल्याणप्रदं )भवति ।
1– कीदृशम्।   2– कथम्।   3– कम्।   4–काम्

IV अधोलिखितं कथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं क्रियताम् –

1. तत् आकर्ण्य स मुनिः विस्मित :
(क) कम   ख) काम्   (ग) कः   (घ) कथम्

2. मुनिः तद्गृहाद् निरगच्छत् ।
क) कात्   ख) कुतः   ग) कस्मात्   घ) काद्

3. भर्तृसेवायाः अपरः धर्मः नास्ति ।
क) कायाः   ख) कस्याः   ग) कस्मात्   घ) कस्य

4. साध्वी भिक्षामादाय मुनेः अन्तिकम् आगता।
क) के.   ख ) कस्य   ग) काः   घ) कम्

5. तपसः प्रभावात् अहङ्कारम् उपगतः।
(क) कम   (ख) काम्   (ग) किम्   (घ) कस्य

6. नाहं बालकेति गृहिण्या कथितम्।
(क) कया   (ख) काम्   (ग) किम्   (घ) कथम्

7. पतिव्रता गृहिणी विहस्य अभाषत्।
(क) कम   (ख) काम्   (ग) किम्   (घ) कीदृशी

8. मुनिः पिपासया पीडितः अभवत्।
(क) कम   (ख) कया   (ग) किम्   (घ) कथम्

9) मुनिना वने आह्लादकरः शब्दः श्रुतः।
(क) कम   (ख) काम्   (ग) कीदृशः   (घ) कथम्

**प्रश्नाः –**

1) कः   2) कस्मात्   3) कस्याः   4 ) कस्य   5) कस्य   6) कया   7) कीदृशी   8 ) कया   9) कीदृश :

अभ्यासार्थ-

1. ग्रामे निर्धना स्त्री अवसत्।
   उत्तरम् : ग्रामे का अवसत्?
2. स्वर्णकाकं निवारयन्ती बालिका प्रार्थयत्।
   उत्तरम् : कं निवारयन्ती बालिका प्रार्थयत्?
3. सूर्योदयात् पूर्वमेव बालिका तत्रोपस्थिता।
   उत्तरम् : कस्मात् पूर्वमेव बालिका तत्रोपस्थिता?
4. बालिका निर्धनमातुः दुहिता आसीत्।
   उत्तरम् : बालिका कस्याः दुहिता आसीत्?

5. लुब्धा वृद्धा स्वर्णकाकस्य रहस्यमभिज्ञातवती।
उत्तरम् : लुब्धा वृद्धा कस्य रहस्यमभिज्ञातवती।

6. मल्लिका सखिभिः सह धर्मयात्रायै गच्छति स्म।
उत्तरम् : मल्लिका काभि: सह धर्मयात्रायै गच्छति स्म?

7. चन्दनः दुग्धदोहनं कृत्वा एव स्वप्रातराशस्य प्रबन्धम् अकरोत्।
उत्तरम् : चन्दनः दुग्धदोहनं कृत्वा एव कस्य प्रबन्धम् अकरोत्?

8. मोदकानि पूजानिमित्तानि रचितानि आसन्।
उत्तरम् : कानि पूजानिमित्तानि रचितानि आसन्?

9. मल्लिका स्वपतिं चतुरतमं मन्यते।
उत्तरम् : मल्लिका स्वपतिं कीदृशं मन्यते?

10. नन्दिनी पादाभ्यां ताडयित्वा चन्दनं रक्तरञ्जितं करोति।
उत्तरम् : का पादाभ्यां ताडयित्वाचन्दनं रक्तरञ्जितं करोति?

11. वृत्ततः क्षीणः हतः भवति।
उत्तरम् : कस्मात् क्षीणः हतः भवति?

12. धर्मसर्वस्वं श्रुत्वा अवधार्यताम्।
उत्तरम् : कम् श्रुत्वा अवधार्यताम्?

13. वृक्षाः फलं न खादन्ति।
उत्तरम् : के फलं न खादन्ति?

14. खलानाम् मैत्री आरम्भगुर्वी भवति।
उत्तरम् : केषाम् मैत्री आरम्भगुर्वी भवति?

15. स्वादूनि भक्ष्यकवलानि ते दास्यामि।
उत्तरम् : कीदृशानि भक्ष्यकवलानि ते दास्यामि?

16. चटकः स्वकर्मणि व्यग्रः आसीत्।
उत्तरम् : चटकः कस्मिन् व्यग्रः आसीत्?

17. कुक्कुरः मानुषाणां मित्रम् अस्ति।
उत्तरम् : कुक्कुरः केषां मित्रम् अस्ति?

18. सः महती वैदुषीं लब्धवान्।
उत्तरम् : सः काम् लब्धवान्?

19. रक्षानियोगकरणात् मया न भ्रष्टव्यम् इति।
उत्तरम् : कस्मात् मया न भ्रष्टव्यम् इति?

20. तपोदत्तः तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽसि।
उत्तरम् : तपोदत्तः कया विद्यामवाप्तुं प्रवृत्तोऽसि?

21. तपोदत्तः कुटुम्बिभिः मित्रैः गर्हितः अभवत्।
उत्तरम् : कः कुटुम्बिभिः मित्र: गर्हितः अभवत्?

22. पुरुषः नद्यां सिकताभिः सेतुं निर्मातुं प्रयतते।
उत्तरम् : पुरुषः कुत्र सिकताभिः सेतुं निर्मातुं प्रयतते?

23. तपोदत्तः अक्षरज्ञानं विनैव वैदुष्यमवाप्तुम् अभिलषति।
उत्तरम् : तपोदत्तः कम् विनैव वैदुष्यमवाप्तुम् अभिलषति?

24. तपोदत्तः विद्याध्ययनाय गुरुकुलम् अगच्छत्।
उत्तरम् : तपोदत्तः किमर्थं गुरुकुलं अगच्छत्?

25. गुरुगृहं गत्वैव विद्याभ्यास: करणीयः।
उत्तरम् : कुत्र गत्वैव विद्याभ्यासः करणीयः?

26. वनवृक्षाः निर्विवेकं छिद्यन्ते।
उत्तरम् : के निर्विवेकं छिद्यन्ते?

27. वृक्षकर्तनात् शुद्धवायुः न प्राप्यते।
उत्तरम् : कस्मात् शुद्धवायुः न प्राप्यते?
28. प्रकृतिः जीवनसुखं प्रददाति।
उत्तरम् : प्रकृतिः किं प्रददाति?
29. अजातशिशुः मातृगर्भे सुरक्षितः तिष्ठति।
उत्तरम् : अजातशिशुः कुत्र सुरक्षितः तिष्ठति?
30. पर्यावरणरक्षणं धर्मस्य अङ्गम् अस्ति।
उत्तरम् : पर्यावरणरक्षणं कस्य अङ्गम् अस्ति?
31. मथ्यमानस्य दनः अणिमा ऊर्ध्वं समुदीषति।
उत्तरम् : कीदृशस्य दनः अणिमा ऊर्ध्वं समुदीषति?
32. भवता घृतोत्पत्तिरहस्यं व्याख्यातम्।
उत्तरम् : केन घृतोत्पत्तिरहस्यं व्याख्यातम्?
33. आरुणिम् उपगम्य श्वेतकेतुः अभिवादयति।
उत्तरम् :आरुणिं उपगम्य कः अभिवादयति?
34. श्वेतकेतुः वाग्विषये पृच्छति।
उत्तरम् : श्वेतकेतुः कस्य विषये पृच्छति?

प्रश्न निर्माणाय केचन अभ्यासा: -

1. तस्याः दुहिता विनम्रा मनोहरा च आसीत्।
2. सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।
3. एको विचित्रः काकः समुड्डीय तामुपजगाम।
4. एतादृशः स्वर्णकाकः तया पूर्वं न दृष्टः।
5. चन्दनः मोदकानि खादति।
6. तात! पञ्चदश घटान् इच्छामि।
7. धेनुः पृष्ठपादेन प्रहरति।
8. सः धेनो: बहुसेवां करोति।
9. धर्मसर्वस्वं श्रुत्वा अवधार्यताम्।
10. वृक्षाः स्वयं फलानि न खादन्ति।
11. वारिवाहाः स्वयमेव सस्यं नादन्ति।
12. सतां विभूतयः परोपकाराय भवन्ति।
13. पुरुषैः सदा गुणेष्वेव प्रयत्नः कर्त्तव्यः।
14. भ्रमितः बालः चटकमेकम् अपश्यत्।
15. ते स्वादूनि भक्ष्यकवलानि दास्यामि।
16. स्वामी मां पुत्रप्रीत्या पोषयति।
17. इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।
18. जलोच्छलनस्य ध्वनिः श्रूयते।
19. मानव: पर्यावरणकुक्षौ सुरक्षितस्तिष्ठति।
20. अस्माभिः प्रकृतिः रक्षणीया।

**उत्तराणि** - 1.का 2. कान् 3. कीदृश: 4. कया 5. क: 6. कान् 7. केन 8. कस्या: 9. किं 10. कानि 11. के 12. केषां 13. कै: 14. कीदृश: 15. कानि 16. कं 17. कया 18. का 19. कुत्र 20. का

***************************************************************************************************

## विषय:-17 ,अन्वय: भावार्थश्च

**अन्वय:-**

श्लोकार्थानुरूपं सरलवाक्यनिर्माणमेव अन्वय: I यथा वयं जानीम: एव श्लोका: काव्यसौन्दर्यवर्धनाय छन्दोबद्धा: , अत: श्लोके शब्दा: समुचित क्रमे न भवन्ति I तेषां शब्दानां समुचित अर्थक्रमेण लेखनं एव अन्वय: भवति I

अन्वयं कर्तुं केचन अवधातव्या: बिन्दव:-

अन्वय: श्लोकस्य अर्थस्याधारेण एव भवति अत: विद्यार्थिभि: पाठ्यक्रमस्य सर्वे श्लोका: अवश्यमेव पठनीया: I

- अन्वये कर्ता पूर्वं तथा क्रिया पश्चात लेखनीया I
- विशेष्य – विशेषणपदा: तेषां लिङ्गं , विभक्ति: वचनानुसारेण लेखनीया: I
- अन्वये संधियुक्त शब्दा: समासयुक्त शब्दा: च पृथक्-पृथक् रूपेण लिख्यन्ते I

**भावार्थ:-** श्लोकस्य अर्थस्य लेखनं एव भावार्थ: कथ्यते I केचन ध्यातव्या: बिन्दव:-

- भावार्थलेखने श्लोकस्य अर्थ: सरलसंस्कृतभाषया लेखनीय:I
- अद्यत्वे परिक्षासु "रिक्तस्थान पूर्ति:" माध्यमेन भावार्थलेखनं करणीयं भवति I
- भावार्थलेखने मन्जुषा दत्ता भवति I

पाठः, अन्वयः, शब्दार्थः, अनुवादश्च

**(क) छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे। फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥ 1 ॥**

**अन्वयः - छायाम् अन्यस्य कुर्वन्ति, स्वयम् आतपे तिष्ठन्ति, फलानि अपि परार्थाय, वृक्षाः सत्पुरुषाः इव भवन्ति ।**

**शब्दार्थ** - कुर्वन्ति - करते हैं। तिष्ठन्ति - ठहरते हैं। आतपे - धूप में। फलानि - फलों की। परार्थाय - दूसरों के लिए। सत्पुरुषाः इव - सज्जनों की तरह।

होते हैं। अर्थ-छाया दूसरों के लिए करते हैं, स्वयं धूप में रहते हैं, फलों को दूसरों को (प्रदान करते हैं), वृक्ष सज्जनों की तरह।

**ख) अहो। एषां वरं जन्म सर्वप्राण्युपजीवनम्। धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ॥**

**अन्वयः – अरे, एषाम् सर्व-प्राणि-उपजीवनम् जन्म वरम्। महीरुहाः धन्याः, येभ्यः अर्थिनः निराशाः न यान्ति।**

**शब्दार्थ**-एषाम्-इन (वृक्षों) का। सर्व-प्राणि-उपजीवनम् – सब प्राणियों का आश्रयभूत (आश्रय का साधन) इन वृक्षों का। जन्म-पैदा होना। धन्याः – सौभाग्यशाली। वरम् श्रेष्ठ। महीरुहाः- वृक्ष, पृथ्वी पर उगने वाले। येभ्यः – जिनसे। अर्थिनः- याचक। निराशाः – निराश होकर। न यान्ति- नहीं जाते।

**अर्थ**-अरे ! सभी प्राणियों (जीवों) का आश्रयभूत इन वृक्षों का जन्म श्रेष्ठ है। ये वृक्ष धन्य हैं जिनसे प्रार्थना करने वाले याचक निराश होकर नहीं जाते

**(ग) पत्र-पुष्प-फलच्छाया-मूल-वल्कलदारुभिः। गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते ॥ 3 ॥**

**अन्वयः – पत्र-पुष्प-फल-च्छाया-मूल-वल्कल-दारुभिः गन्ध-निर्यास-भस्म-अस्थि-तोक्मैः कामान् वितन्वते। शब्दार्थ-पत्र**

दारुभिः – पत्ता, फूल, फल, छाया, मूल (जड़), छाल तथा लकड़ियों से। गन्धः – महक। नियांसः- गोंद। भस्मास्थि – कोयला, राख। तोक्मैः – छालों से। कामान् – इच्छाओं को। वितन्वते – पूरा करते हैं। अर्थ- (वृक्ष) पत्ते, फूल, फल, छाया, जड़, छाल व लकड़ी से, तथा गन्ध, गोंद (रस), कोयला और छालों से लोगों की इच्छाओं को पूरा करते हैं।

**(घ)। .आम्र ! यद्यपि गता दिवसास्ते पुष्पसौरभफलप्रचुरा ये। हन्त ! सम्प्रति तथापि जनानां छाययैव दलयस्यतितापम् ॥ 4 ॥**

**अन्वयः – (हे) आम्र ! यद्यपि ते दिवसाः गता ये पुष्प-सौरभ-फल-प्रचुराः (आसन्)। हन्तः। तथापि सम्प्रति जनानां अतितापम् छायया एव दलयसि।**

**शब्दार्थ**-पुष्प-सौरभ-फल-प्रचुराः – फूल, गन्ध तथा फलों से भरपूर। ये- जो। दिवसाः – दिन। ते-वे (दिन)। गताः – बीत गये। तथापि – फिर भी। सम्प्रति – अब। छायया – छाया से। एव- ही। जनानाम्-लोगों के। अतितापं – अत्यधिक ताप (सन्ताप, धूप) को। दलयसि – दूर करते हो। हन्त – प्रसन्नता की बात है।

**अर्थ**- हे आम ! यद्यपि वे दिन बीत गये, जो फूल, सुगन्ध और फलों से भरपूर थे, फिर भी, प्रसन्नता की बात है कि तुम (अब भी) लोगों की अत्यधिक ताप को अपनी छाया से ही दूर करते हो।

**(ङ) मूलं भुजङ्गः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गः। नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्त्वभरैः समन्तात् ॥ 5**

**अन्वयः – भुजङ्गैः मूलम् आश्रितम्, प्लवङ्गैः शिखरम् (आश्रितम्) विहङ्गैः शाखाः (आश्रिताः) भृङ्गैः कुसुमानि (आश्रितानि) चन्दन-पादपस्य तत् न एव अस्ति यत् समन्तात् सत्त्व-भरैः न आश्रितम् ।**

**शब्दार्थ –** भुजङ्गः – साँपों के द्वारा। मूलम् – जड़। प्लवगैः – बन्दरों से। शिखरम् – चोटी। विहगैः- पक्षियों से। शाखाः – टहनियाँ । भृङ्गैः – भौरों से। कुसुमानि – फूल। चन्दनपादपस्य – चन्दन के वृक्ष का। तत्- (कोई) वह भाग। न एव अस्ति – नहीं हैं। यत्- जो (भाग)। समन्तात् – चारों ओर से। सत्त्व-भरैः – प्राणि-समूह से। न आश्रितम् – आश्रित नहीं है।

**अर्थ-** चन्दन के वृक्ष की जड़ सर्पों के द्वारा, चोटी बन्दरों के द्वारा, टहनियाँ पक्षियों के द्वारा और भौरों के द्वारा फूल आश्रय बनाये गये हैं। चन्दन के वृक्ष का कोई भी वह भाग नहीं है जो चारों ओर से प्राणि-समूह के द्वारा आश्रय न बनाया गया हो।

**(च) निम्ब ! त्वदीयकटुता यदि दाहहन्त्री, गायन्तु मूढमनुजास्तव दोषगाथाः ।**

**तप्तास्त एव तपनोपमपित्ततापैः गास्यन्ति मित्रवर ! तावकगीतकानि ।। 6 ।।**

**अन्वयः – निम्ब, यदि त्वदीय-कटुता दाह-हन्त्री (अस्ति), मूढ-मनुजाः तव दोष-गाथाः गायन्तु। मित्रवर, तपन-उपम- पित्त-तापैः तप्ताः ते एव तावक-गीतकानि गास्यन्ति।**

**शब्दार्थ –** निम्ब – हे नीम। त्वदीय – तुम्हारी। कटुता – कडुवाहट। दाह- पित्त की जलन को। हन्त्री – मारने वाली, शान्त करने वाली। मूढ-मनुजाः- मूर्ख व्यक्ति। दोष-गाथाः- कमियों की कहानी। गायन्तु-गायें, बार बार कहें। मित्रवर-

हे मित्रों में श्रेष्ठ। तपन – सूर्य के। उपम- समान। पित्त-तापैः- पित्त के जलन दोषों से। तप्ताः – तपे हुए, सन्तप्त लोग। तावक – तुम्हारे । गीतकानि – गीत। गास्यन्ति – गायेंगे।

**अर्थ**-अरे नीम। अगर तेरी कडुवाहट पित्त के ताप को शान्त करने वाली है, तो मूर्ख मनुष्य (भले ही) तेरे दोषों का कथाओं का गायन करें पर हे श्रेष्ठ मित्र ! सूर्य के समान पित्त के तापों से सन्तप्त लोग तेरे गीतों को गायेंगे।

**(छ) धत्ते भरं कुसुमपत्रफलावलीनां घर्मव्यथां वहति शीतभवां रुजं च। य सर्वमर्पयति चान्यसुखस्य हेतोः, तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥ 7 ॥**

**अन्वयः – यः कुसुम-पत्र-फलावलीनां भरम् धत्ते, घर्मव्यथां शीतभवाम् च रुजम् वहति। यः च अन्य-सुखस्य हेतोः देहम् अर्पयति , तस्मै वदान्य-गुरवे तरवे नमः अस्तु ।**

अर्पयति शब्दार्थ-कुसुम-पत्र-फलावलीनां – फूल, पत्ते तथा फलों के। भरम्-भार को। धत्ते-धारण करता है। घर्म- व्यथाम्- घाम के कष्ट को। शीतभवाम् – सर्दी से होने वाली। रुजम् – पीड़ा को। वहति—वहन करता है। अन्य-सुखस्य–दूसरों के सुख के। हेतोः- हेतु, कारण। देहम् – शरीर को। अर्पयति – अर्पित करता है। तस्मै-उस। वदान्य-गुरवे – उदारों में गुरु या श्रेष्ठ के लिए। नमः अस्तु – नमस्कार होवे।

**अर्थ**-जो फूल, पत्ते तथा फलों के समूह के भार को धारण करता है। घाम के कष्ट को तथा शीतलता से होने वाली पीड़ा को वहन करता है तथा जो दूसरों के सुख के लिए शरीर को अर्पित करता है, उदारों में श्रेष्ठ उस वृक्ष के लिए नमस्कार हो।

इदानीं पाठ्य पुस्तकात् उदाहरण रुपेण केषाञ्चित प्रष्टव्यानां श्लोकाणां अन्वयः भावार्थः च क्रियते।

*******************************************************************************************

## प्रश्न 18. प्रसङ्गानुसारं अर्थ चयनम्

प्रश्नोऽयं बहुविकल्पात्मको भवति। यत्र पंक्तिमेकां प्रदाय एकः शब्दः रेखाङ्कितः भवति तस्य त्रयः चत्वारो वा विकल्पाः दीयन्ते प्रसङ्गानुगुणं च अर्थं विचित्य लेखनीयं भवति। अतः अस्मिन् क्रमे पाठानां गद्यानां पद्यानां उचितार्थं बोधनपूर्वकं गभीरतया पठनं चिन्तनं वा आवश्यकं भवति।विशेषतः पर्यायपदानां ज्ञानं तु महद् आवश्यकं वर्तते।

**इस प्रकार के प्रश्न में वाक्य में दिए गए रेखांकित पद के लिए विकल्पों में से उपयुक्त अर्थ का चयन करना होता है || अतः शब्दों के पर्यायवाची याद रखना आवश्यक है | यहाँ पाठों में दिए गए कुछ शब्दों के पर्याय सहित उदाहरण दिए जा रहे हैं –**

पदानि - पर्यायाः

1-क्षिप्रम् = शीघ्रम्, सत्वरम्, त्वरया,झटिति
2- द्रुमः = वृक्ष, तरुः,महीरुहः, विटपः
3- सहसा= अकस्मात्, हठात्,
4-विप्रः = ब्राह्मणः
5- पयोदः = मेघः, जल्दी, वारिदः,
6- पयोधिः= समुद्रः 'सिन्धु, सागरः, जलधि
7- रिपुः= शत्रुः
8- वित्तम् = धनम्, द्रविणम् ,अर्थः
9- जननी= माता, अम्बा
10- व्रजन्ति = गच्छन्ति
11- भूयः = पुनः
12- गड्गेन = कृपाण
13- किंशुकाः= पलाशपुष्पाणि
14- अश्मा = पाषाणम्, प्रस्तरम्
15- अवाप्स्यसि= प्राप्यसि, लप्स्यसे
16- अन्तिकम् = समीपम्, निकषा ,सकाशम्
17- प्रासादेन = कृपया,अनुग्रहेण
18- आकर्ण्य = श्रुत्वा
19- अभिहितः = उक्तः, कथितः
20- भर्तुः =पत्युः
21- अधीत्य = पठित्वा,
22- अणिम्नः = सूक्ष्मात्
23- उपेत्य = समीपं गत्वा
24- आहर= आनय
25- उवाच = अवदत्, अकथयत्, जगाद,
26- घर्मः =आतपः
27- दारुभिः = काष्ठैः
28- प्लवङ्गैः= वानरैः
29- समन्तात् =सर्वतः, परितः
30- भुजङ्गैः = सर्पैः,
31- स्मितम् = मन्दहासम्
32- निशम्य= श्रुत्वा, कार्र्य
33- सकाशात् = समीपात्
34- विधेहि = कुरु
35- अमात्यः = मन्त्री, सचिवः
36- तन्तुवायः=कुविन्दः
37- निरामयाः= नीरोग, स्वस्थाः

38-अवगत्य=ज्ञात्वा, विज्ञाय
39- तृषा = पिपासा
40- सम्बलम् =आश्रयः
41-भानुजा= यमुना
42- भारती= सरस्वती, विद्या
43- पुष्कलम् = पर्याप्तम्, विपुलम्, बहु, अधिकम्
44- विसृज= त्यज, मुञ्च
45- उपाध्यायः =आचार्यः, गुरुः,
46- वटः= वृक्षः
47- उद्भवति =जायते,उत्पत्ति,उत्पन्न भवति
48- तमः = अन्धकारः

**अभ्यास- प्रश्नाः**

1- भारतं वर्तते मे परं ( सम्बलम्)
क- जीवनम् ख– आश्रयः ग– उद्देश्यम् घ- शोभा
2- (भारती) वल्लकीझङ्कृतैर्झङ्कृतम् ।
क- लक्ष्मी। ख– नन्दी। ग– सरस्वती। घ-भारतीयः।
3- सर्वे सन्तु (निरामयाः)।
क– सुखिनः। ख– नीरोगाः। ग– धनिकाः घ–दरिद्राः
4- मुनिः ( तृषा) आकुलतां विस्मृत्य वेगेन आश्रमं आगतवान्।
क– वृथा। ख– तृप्तिः। ग— पिपासा। घ–शीघ्रता
5- गृहाण ( पुष्कलम्) स्वर्णमयं पारितोषिकम्।
क– पर्याप्तम्। ख– न्यूनम्। ग– नवीनम्। घ– प्राचीनम्
6- एष राजादेशः ( विसृज) कार्यम्।
क- गृहाण। ख– त्यज। ग– सृज। घ- सर्पः
7- ते अन्योन्यं पश्यन्तः( स्मितं )अकुर्वन्।
क- अट्टहासम्। ख– मन्दहासम्। ग– वार्तालापम्। घ— विचारम्
8- इदं ( निशम्य) अष्टावक्रः प्रत्यवदत्।
क— श्रुत्वा। ख– निश्चयेन। ग— आगत्य। घ– आनीय
9- आशङ्कां मा ( विधेहि)।
क— नय। ख– विभेद। ग– कुरु। घ– दृष्ट्वा
10- अहं पित्रा सह( क्षिप्रम्) आगमिष्यामि।
क– चिरं। ख— खाद। ग– मनाक्। घ– शीघ्रम्
11- चन्दनपादपस्य शिखरं ( प्लवङ्गैः) शोभते।
क— मूषकैः ख— मयूरैः ग— खगैः। घ—- वानरैः
12- वृक्षेभ्यः ( अर्थिनः) निराशाः न यान्ति।
क– शिखिनः ख - याचकाः। ग— दातारः। घ– राजानः
13- श्वेतकेतुः आचार्यं (उपेत्य )वेदान् अपठत्।
क– आगत्य। ख– समीपं गत्वा। ग– उपकृत्य घ– उवाच
14- श्वेतकेतुः पितुः ( सकाशम्) अगच्छत्।
क– समीपम्। ख– दूरम्। ग– आकाशम्। घ–अपृच्छत्
**********************************************************************************************

## प्रश्न 19. पाठाधारित-कथापूर्तिः

**अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथासूत्रं योजयत-**

### कथापूर्तिः 2

[ तरुच्छायायाम्, मुनिः, भस्मसाद् अभूत्, महातपा नाम, मुनेः, विष्ठाम्, भिक्षाम्, प्रतीक्षस्व क्षणम्, विस्मितः, नाहं बलाकेति, क्रुद्धदृष्ट्या]

एकदा ………………………मुनिः………………………उपविष्ट आसीत् । एका बलाका तस्योपरि ……………………… उदसृजत्। सा बलाका ……………………… क्रोधदृष्ट्या ………………………। पुनः एकदा असौ ……………………… एकां गृहिणीं……………………… अयाचत । पतिसेवारता सा अवदत्………………………। तदा मुनिः तां ……………………… अपश्यत्। सा विहस्य अवदत्………………………। एतच्छुत्वा मुनि: अतीव ………………………जातः।

### कथापूर्तिः 2

अस्ति उज्जयिन्यां 1……………….. नाम विप्रः। एकदा तस्य भार्या स्वबालापत्यस्य 2……………….. तम् अवस्थाप्य स्नातुं गता। अथ ब्राह्मणः राज्ञा 3……………….. निमन्त्रितः । ब्राह्मणः सहजदारिद्रयात् अचिन्तयत्-यदि 4……………….. न गच्छामि तर्हि अन्यः कश्चित् श्राद्धार्थं 5……………….. भवेत्। यतः-' आदानस्य प्रदानस्य कर्तव्यस्य च 6……………….. । क्षिप्रमक्रियमाणस्य कालः पिबति तद् 7……………….. ॥ किन्तु बालस्य अत्र 8……………….. नास्ति। तत् किं करोमि ? भवतु, चिरकालपालितम् इमं 9……………….. नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि । तथा कृत्वा 10………………..

**मञ्जूषा-**

(रक्षार्थं, कर्मणः , रसम्, वृतः, माधवः, रक्षकः, पुत्रनिर्विशेषं, गतः, सत्वरम्, श्राद्धार्थं)

### कथापूर्तिः 3

ततस्तेन नकुलेन बालसमीपम् उपसर्पन् 1……………….. दृष्टः । स तं व्यापाद्य 2……………….. कृतवान्। अत्रान्तरे ब्राह्मणोऽपि श्राद्धं गृहीत्वा गृहम् 3……………….. । ब्राह्मणं दृष्ट्वा नकुलः रक्त-विलिप्त-मुख-पादः तस्य 4……………….. अलुठत् । विप्रः तथाविधं तं दृष्टवा बालकोऽनेन 5………………..'इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् 6……………….. अपत्यं पश्यति तावद् बालकः 7……………….. सर्पश्च व्यापादितः तिष्ठति। ततः तम् उपकारकं 8……………….. मृतं निरीक्ष्य 9……………….. मुषितं मन्यमानः ब्राह्मणः परं10……………….. अगच्छत्।

**मञ्जूषा-**

( नकुलं, खादितः, कृष्णसर्पः, चरणयोः, उपावृत्तः, आत्मानं, सुस्थः, विषादम्, खण्डशः, उपसृत्य)

### कथापूर्तिः 4

आसीत् पुरा कोऽपि 1……………….. नाम वनवासी मुनिः। एकदा यदा स तरुच्छायोपविष्ट आसीत्। तदा तस्योपरि एका 2……………….. विष्ठाम् उदसृजत्। स च क्रुद्धस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका 3……………….. अभवत्। ततश्च स मुनिः तपःप्रभावाद् अहङ्कारम् 4……………….. एकदा अयं क्वापि नगरे एकं ब्राह्मणगृहं प्राप्य तद्गृहिणीं भिक्षामयाचत । सा 5……………….. गृहिणी तमवदत्- "" प्रतीक्षस्व क्षणं, यावद् भर्तुः 6……………….. समापये "' इति। एतत् 7……………….. स मुनिः तां कोपदृष्ट्या दृष्टवान्। सा 8……………….. अभाषत- "मुने! न अहं बलाकेति! ' । तत् आकर्ण्य 9……………….. मुनिः "*एतत् कथमिव ज्ञातमनया!* इति चिन्तयन् तत्र 10……………….. ।

**मञ्जूषा-**

(उपगतः, महातपा, विहस्य, बलाका, पतिव्रता, भस्मसाद्, रिचर्यां, श्रुत्वा, उपाविशत्, विस्मितः)

### कथापूर्तिः 5

ततश्च सा साध्वी 1……………….. शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः2 ……………….. तामवदत् - "*कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो 3……………….. ग्रहीष्ये ।' ' साऽवदत् - "" मुने! न भर्तृसेवायाः अपरं कञ्चन 4……………….. करोम्यहम्। तत्प्रसादेन एव मे एतादृशं 5……………….. । किञ्च इतः धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् 6……………….. । ततस्ते श्रेयो 7……………….. त्वं च 8……………….. भविष्यसि इति" । एवं 9……………….. पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां 10……………….. तद्गृहाद् निरगच्छत्।

**मञ्जूषा-**

(भर्तुः, प्रणम्य, भविष्यति, भिक्षां, बद्धाञ्जलिः, निरहङ्कारः, सर्वविदा, धर्मं, पृच्छ, विज्ञानम्)

**कथापूर्तिः 6**

अन्येद्युः सः मुनिः समन्विष्य तं 1……………….. मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत - '*ब्रह्मन्!किं पतिव्रतया तया इह त्वं प्रेषितः " ? तत् आकर्ण्य स मुनिर्विस्मितः तं धर्मव्याधम् अवदत्- “ भद्र! मांसविक्रयिणः ते कथम् ईदृशं 2………………..? धर्मव्याधः अवदत्- “ब्रह्मन्! अहं मातापित्रोर्भक्तः । तौ हि मम 3 ……………….. । अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं 4……………….. ।5 ……………….. च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां च मृगादीनां मांसानि स्वधर्म इति मत्वा वृत्यर्थ6 ……………….. न तु धनलिप्सया । हे मुने! ज्ञानविघ्नो 7……………….. । अतः स्वधर्मं चर, येन आशु परं श्रेयः अवाप्स्यसि ' | ततश्च धर्मव्याधेन एवम् 8……………….. स मुनिः तद्गृहं गत्वा धर्मव्याधस्य च सर्वं क्रियाविधिम् अवलोक्य 9……………….. वनं गतवान् अवाप्तवान् च तदुपदेशात् सिद्धिम्। उक्तञ्च कर्मणैव हि 10 ……………….. आस्थिता जनकादयः।

**मञ्जूषा-**

(विपणिस्थं, परितुष्टः, परायणं, अनुशिष्टः, विक्रिणे, अहङ्कारः, संसिद्धम्, स्वीकरोमि, विज्ञानम्, शाययित्वा)

**********************************************************************************************

# केन्द्रीय-विद्यालयः संगठनम्

## आदर्श प्रश्नपत्रम्-1 (उत्तरित)

कक्षा- ( IX ) कोड 119; विषयः- संस्कृतम्

समयः – होरात्रयम् पूर्णाङ्काः - 80

सामान्य निर्देशाः -

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति |
2. उत्तरलेखनात् पूर्वम् प्रश्नसंख्या अवश्यं लेखनीया |
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
4. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः |

| | | |
|---|---|---|
| | (खण्ड - क) अपठित अवबोधनम् - 10 | |
| 1. | गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत ;-<br>भारते उत्सवाः द्विविधाः सन्ति - राष्ट्रीयाः उत्सवाः अन्ये च पारम्परिकाः उत्सवाः। 1947तमे वर्षे अगस्तमासस्य पञ्चदशदिनाङ्के अस्माकं देशः स्वतंत्रः जातः।अतः समग्रे देशे अयम् उत्सवः आयोज्यते । एवमेव 1950 तमे वर्षे जनवरी मासस्य षड्विंशतितिथौ गणतंत्रदिवस-समारोहः भवति ।एतौ अस्माकं राष्ट्रीयौ उत्सवौ । पारम्परिक-उत्सवेषु एकः विशिष्टः उत्सवः श्रावणपूर्णिमा वर्तते । श्रावणपूर्णिमा दिनं भारतस्य केन्द्रशासनेन संस्कृतदिवसः घोषितः अस्ति। अतः समग्रे देशे संस्कृतज्ञाः संस्कृतोत्सवम् मानयन्ति । संस्कृतदिवसे अस्माभिः संस्कृतकार्यक्रमेषु भागः ग्रहीतव्यः । अस्मिन् दिने विदुषां मेलनं , संस्कृतनाटकानां मञ्चनम् , परिचर्चा , श्लोकोच्चारणम् , संवादः , प्रदर्शनी , इत्यादयः बहवः कार्यक्रमाः आयोजिताः भवन्ति । संस्कृतम् अस्माकं देशस्य गौरवम् इति अस्माभिः सर्वदा स्मरणीयम् । अस्माकं संस्कृतिः संस्कृताश्रिता । अतएव उच्यते – “ भारतस्य प्रतिष्ठे द्वे - संस्कृतं संस्कृतिस्तथा।“<br>(I) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(क) जनवरी मासस्य षड्विंशतितिथौ किं भवति ?<br>(ख) किं दिनं संस्कृतदिवसः इति घोषितः ?<br>(ग) एतौ अस्माकं राष्ट्रीयौ कौ ?<br>(II) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(क) अगस्तमासस्य पञ्चदशदिनाङ्के कः स्वतंत्रः जातः ?<br>(ख) अस्मिन् दिने के के कार्यक्रमाः आयोजिताः भवन्ति ?<br>(ग) अस्मिन् दिने अस्माभिः केषु भागः ग्रहीतव्य ?:<br>(III) अनुच्छेदस्य उचितं शीर्षकं लिखत -<br>(IV) भाषिककार्यम् - (केवलं प्रश्नत्रयम्)<br>(क) ‘ सम्पूर्ण ’ इति अर्थे किं पदम् अत्र प्रयुक्तम्?<br>(I) वर्तते (II) समग्रे (III) देशे (IV) स्थान<br>(ख) ‘द्वे इति पदस्य किं पदं विशेष्यपदम् ?<br>(I) प्रतिष्ठे (II) प्रतिष्ठः (III) प्रतिष्ठम् (IV) प्रतिष्ठस्य<br>(ग) ’मूर्खाणाम्’ इत्यस्य किं विलोमपदं अत्र प्रयुक्तम्?<br>(I) विदुषाम् (II) ज्ञाननाम् (III) छात्राणाम् (IV) अध्येतृणाम्<br>(घ) ’ राष्ट्रीयाः उत्सवाः ’ अत्र विशेषणपदम् किम् ?<br>(I) भारते (II) उत्सवाः (III) राष्ट्रीयाः (IV) अन्ये | 1x2=2<br><br>2x2=4<br><br>1x1=1<br><br>1x3=3 |
| | ( खण्ड – ख ) रचनात्मकंकार्यम् - 15 | |
| | 2. स्व विद्यालयस्य वर्णनम् कुर्वन् मित्रं सज्जीवं प्रति अधोलिखिते पत्रे रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत ।<br>(1)--------------<br>15.10.2021<br>प्रिय (2)--------------<br>(3)------------------ भवतः पत्रं प्राप्तम्। महान् सन्तोषः | ½X10=5 |

अभवत्। यथा भवता कथितम् तथा अहं पत्रोत्तरे

स्व विद्यालयस्य वर्णनं (4)--------------। मम (5)--------------अतीव विशाल: सुन्दर: च अस्ति। अत्र त्रिसहस्रं छात्रा: (6)--------------पठन्ति। (7)--------------पुस्तकानां पत्रपत्रिकाणां . च सुव्यवस्था अस्ति। (8)-------------- वालीबाल-बैडमिन्टन्- क्रिकेट्-रज्जु आकर्षणादि . खेलानां उत्तम: प्रबन्ध: अस्ति। मातापित्रो: मम (9)-------------- ।

भवत: (10)-------------- क ख ग

| विद्यालय:, नमस्कार: , क्रीडाक्षेत्रे, प्रणामा:, मित्रम्, पुस्तकालये , करोमि, सञ्जीव, मनोयोगेन, परीक्षाभवनम् |
|---|

**3.चित्रं दृष्ट्वा मञ्जूषापदसहायतया संस्कृते पञ्चवाक्यानि लिखत : –** **1X5=5**



| वृक्ष:, दोला, बालक:, क्रीडति, पक्षी, उद्यानम्, हंसौ, तरत:, जले, पत्राणि, सन्ति, पश्यति, सूर्य:, मेघ:, डयन्ते, अस्ति |
|---|

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया " दीपावलीपर्व " इति विषयमधिकृत्य संस्कृते पञ्चवाक्यानि लिखत :-** .

**4.अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत-** **½×10=5**

| मेलितुम् , देहल्यां , प्रभात: , दशम्यां , कक्षायां , मित्रम् , नाम , कारणात् , जानासि , विद्यालय: |
|---|

एक: - भो । नमस्कार: ।
द्वितीय: - नमस्कार: ।
एक: - तव ( 1 ) ................ किम् अस्ति ?
द्वितीय: - मम नाम दिवाकर: अस्ति ।
एक: - त्वं कस्यां कक्षायां पठसि ?
द्वितीय: - अहं' (2.)...............कक्षायां पठामि ।
एक: - तव (3) .......... कुत्र अस्ति?
द्वितीय: - मम विद्यालय: भारतस्य राजधान्यां (4.) .......... वर्तते ।
एक: - त्वम् अस्माकं विद्यालये कस्मात् (5) ............ आगतवान् ।
द्वितीय: - अहम् अत्र स्वमित्रं (6)......... आगतवान्।
एक: - तव मित्रं कस्यां कक्षायां पठति ?
द्वितीय: - स: तु नवम्यां (7).....................पठति ।
एक: - तस्य नाम किमस्ति ?
द्वितीय: - तस्य नाम अस्ति (8)...................... |
एक: - अस्तु -अस्तु, प्रभात: तु मम प्रतिवेशी अस्ति ।
द्वितीय: - त्वं मम मित्रम् (9)......... ?
एक: - आम्, अवश्यं स ममापि ( 10 )............. अस्ति ।

## खण्ड-ग अनुप्रयुक्तव्याकरणम् -25 अङ्का:

| | | |
|---|---|---|
| | **5. निम्नलिखितप्रश्नानाम् उत्तराणि उचित विकल्पेभ्यः चित्वा लिखत -**<br>**क) उचितवर्णंचित्वा वर्णविच्छेदं रिक्तस्थानपूर्तिं कुरुत।**<br>**कपोतः – क् +अ+प् +ओ +....+अः**<br>**(अ) त्  (आ) द्  (इ) ध्  (ई) थ**<br>**ख) उचितं वर्णसंयोजनं कुरुत।**<br>**स् + इ+ द् +ध् +इः**<br>**(अ) सिदिः  (आ) सिद्धी  (इ) सिद्धिः  (ई) सिद्धः**<br>**ग) कः वर्णः दन्त्योष्ठ्यः अस्ति ?**<br>**(अ) ख्  (आ) ग्  (इ) घ्  (ई) व्**<br>**घ) कस्य वर्णस्य उच्चारण-स्थानं तालुः अस्ति ?**<br>**(अ) च्  (आ) म्  (इ) ल्  (ई) झ्** | **½×4=2** |
| | **6. रेखांकितपदानां सन्धिं विच्छेदं वा कुरुत –**<br>**क) सर्वदा महोत्साहः स्यात्।**<br>**ख) महिला सदैव गच्छति ।**<br>**ग) जगत् + ईशः संसारस्य कर्ता अस्ति ।**<br>**घ) (ii) इति+उक्तः पिता पुत्रम् उवाच।** | **1x4=4** |
| | **7. अधोलिखितानि वाक्यानि मञ्जूषातः उचित उपपदविभक्ति प्रयोगेण पूरयत –**<br>**क) बालः ................ सह आपणं गच्छति।**<br>**अ) जनकेन  आ) जनके  इ) जनकस्य**<br>**ख) माता ................. प्रति गच्छति।**<br>**अ) गृहम्  आ) गृहात्  इ) गृहस्य**<br>**ग) ............. परितः वृक्षाः सन्ति।**<br>**अ) विद्यालयः  आ) विद्यालयं  इ) विद्यालयेन**<br>**घ) .................... विना सफलता न मिलति।**<br>**अ) परिश्रमेण  आ) परिश्रमः  इ) परिश्रमस्य** | **1x4=4** |
| | **8.कोष्ठकप्रदत्तशब्दानाम् उचितैः शब्दरुपैः वाक्यानि पूरयत –**<br>**क) कक्षायां चत्वारिंशत् ................. पठन्ति। (बालक)**<br>**अ) बालकैः  आ) बालकौ  इ) बालकाः**<br>**ख) मञ्चोपरि चत्वारः ................ सन्ति। (कवि )**<br>**अ) कविः  आ) कवयः  इ) कवेः**<br>**ग) गंगा दीर्घतमा ............. अस्ति । (नदी)**<br>**अ) नदी  आ) नद्यौ  इ) नद्यः**<br>**घ) वृक्षे ........... सन्ति। (फल )**<br>**अ) फलम्  आ) फलस्य  इ) फलानि** | **1x4=4** |
| | **9) उपयुक्त धातुरुपैः वाक्यानि पूरयत –**<br>**क) सः गुरुं ...................। (नम्)**<br>**अ) नमति  आ) नमामि  इ) नमसि**<br>**ख) रमेशः कक्षायां प्रसन्नः ...................... । (अस्)**<br>**अ) अस्ति  आ) सन्ति  इ) स्तः**<br>**ग) ह्यः बुधवासरे वृष्टिः .................... । (भू)**<br>**अ) अभवताम्  आ) अभवन्  इ) अभवत्**<br>**घ) अहम् क्रीडाक्षेत्रम् .................... । (गम्)**<br>**अ) गमिष्यति  आ) गमिष्यामि  इ) गमिष्यामः** | **1x4=4** |
| | **10. रेखांकितपदेषु प्रत्ययं प्रयुज्य विभज्य वा विकल्पेभ्यःचित्वा लिखत–**<br>**क) अहं पठ् + तुमुन् विद्यालयं गच्छामि।** | **1x3=3** |

| | | |
|---|---|---|
| | अ) पठतुम्   आ) पठितुमुन्   इ) पठितुम्<br>ख) त्वं विद्यालयं गत्वा पठसि ।<br>अ) गम् + क्त्वा   आ) गम + त्वा   इ) गच्छ + कत्वा<br>ग) छात्राः गुरुं प्र+नम्+ल्यप् पठन्ति ।<br>अ) प्रम्य   आ) प्रणम्य   इ) प्रनम्य | |
| | 11. कोष्ठकप्रदत्त-समुचित-अव्ययपदेन अधोलिखित-वाक्यानि पूरयत -<br>तत्र , यत्र , अन्यत्र , सर्वत्र<br>क) मोहनस्य भ्राता अध्ययनाय .................. गन्तुम् इच्छति \|<br>ख) वर्षाकाले ....................... जलम् अस्ति \|<br>ग) ............. परिश्रमः भवति ............. सफलता भवति \| | ½x4=2 |
| | 12. अधोलिखित-वाक्येषु समुचित-संस्कृतसख्यापदैः रिक्तस्थानानि पूरयत –<br>क) क्रीडाक्षेत्रेषु .......................(4) बालकाः क्रीडन्ति \|<br>ख) .......................(9) बालिकाः स्नानाय नदीतीरम् आगच्छन् \|<br>ग) त्रिवर्णे ध्वजे ...................(24) अराः सन्ति<br>घ) एकस्मिन् वर्षे ........................(12) मासाः भवन्ति \| | ½x4=2 |
| | **खण्डः 'घ' पठित-अवबोधनम्**   **30 अङ्काः** | |
| | 13. अनुच्छेदं पठित्वा प्रश्नान् उत्तरत-<br>ब्राह्मणं दृष्ट्वा नकुलः रक्त-विलिप्त-मुखपादः तस्य चरणयोः अलुठत् \| विप्रः तथाविधं तं दृष्ट्वा बालकोऽनेन खादितः इति अवधार्य कोपात् नकुलं व्यापादितवान् \| अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् ऽबालकः सुस्थः सर्पश्च व्यापादितः तिष्ठति \| ततः तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमानः ब्राह्मणः परं विषादम् अगच्छत् \| अतः उच्यते –<br>सहसा विदधीत न क्रियामविवेकः परमापदां पदम् \|<br>वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥<br>एकपदेन उत्तरत -<br>(क) ब्राह्मणः कोपात् कम् व्यापादितवान् ?<br>(ख) सम्पदः कं वृणते ?<br>(ग) नकुलेन कः व्यापादितः ?<br>(घ) नकुलस्य मुखं पादाः केन विलिप्ताः ?<br>पूर्णवाक्येन उत्तरत -<br>(क) परमापदां पदं किम् ?<br>(ख) कीदृशः नकुलः ब्राह्मणस्य चरणयोः अलुठत् ?<br>यथानिर्देशम् उत्तरत -<br>क) ब्राह्मणं दृष्ट्वा नकुलः तस्य चरणयोः अलुठत् \| अस्मिन् वाक्ये किं क्रियापदम् अस्ति ?<br>ख) " रक्त-विलिप्त-मुखपादः नकुलः " अत्र किं विशेषणपदम् अस्ति ? | ½x2=1<br><br>1x2=2<br><br>1x2=2 |
| | 14. अधोलिखितम् पद्यांशम् पठित्वा प्रश्नानामुत्तराणि उत्तरपुस्तिकायाम् लिखत-<br>पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितं ।<br>मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥<br>(अ) एकपदेन उत्तरत-<br>(क) पृथिव्यां कति रत्नानि?<br>(ख)रत्नानि कुत्र सन्ति?<br><br>(आ) पूर्णवाक्येन उत्तरत-<br>(क) पृथिव्यां कानि रत्नानि सन्ति?<br>(ख) कैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते? | ½×2=1<br><br>1×2=2 |

| | | |
|---|---|---|
| | (ङ) भाषिककार्यम्-<br>(क) ’त्रीणि रत्नानि’ इत्यनयोः पदयोः विशेषणपदं किम्?<br>(ख) ’विद्वद्भिः’ इति पदस्य विलोमपदम् अत्र किम्? | 1×2=2 |
| | 15. अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानामुत्तराणि उत्तरपुस्तिकायाम् लिखत-<br>(सर्वे आत्मानं हन्तुमुद्यताः)<br>(एतद् दृश्यम् दृष्ट्वा तत्रत्याः भिल्लाः अपि मरणाय तत्पराः भवन्ति )<br>प्रतापः- (सैनिकान् भिल्लान् च आत्मघातं कुर्वतः दृष्ट्वा) स्थीयताम्, स्थीयताम् आत्मघातिनः जनाः तु असूर्यान् लोकान् व्रजन्ति। वीरगत्या मरणमेव कल्याणप्रदं भवति । धैर्येण स्वतन्त्रतायाः उपायाः चिन्तनीयाः ।<br>(नेपथ्ये)<br>विरम्यताम् प्रभो! विरम्यताम्।<br>प्रतापः-श्रुतपूर्व इव स्वरः । (सैनिकं प्रति) वृक्षम् आरुह्य दृश्यताम् कः एषः शब्दापयति ?<br>सैनिकः- (निपुणं निरीक्ष्य) महाराज! मेवाडमन्त्री भामाशाहः खलु एषः ।<br>प्रतापः- अये! भामाशाहः आगतः। कथमस्माकं दौर्भाग्यं भवताऽपि परिज्ञातम्<br>1.एकपदेन उत्तरत -<br>(क) असूर्यान् कान् व्रजन्ति ?<br>(ख) कः वृक्षम् आरूह्य पश्यति?<br>2. पूर्णवाक्येन उत्तरत -<br>(क) कीदृशाः जनाः असूर्यान् लोकान् व्रजन्ति ?<br>(ख) केन स्वतन्त्रतायाः उपायाः चिन्तनीयाः ?<br>3. भाषिककार्यम् -<br>(क) 'श्रुतपूर्वः स्वरः' इति पदस्य किं विशेष्यपदम् अस्ति ?<br>(ख)'परतन्त्रतायाः' इति पदस्य विलोमं चित्वा लिखत । | ½×2=1<br>1×2=2<br>1×2=2 |
| | 16. रेखाङ्कितानि पदानि आधृत्य प्रश्न निर्माणं कुरुत-<br>क) नकुलस्य मुखं पादाः च रक्तेन विलिप्ताः \|<br>ख) सद्भिः लीलया प्रोक्तं शिलालिखितमक्षरम्।<br>ग) वैनतेयः अगच्छन् एकं पदं न गच्छति।<br>घ) ऐश्वर्यस्य विभूषणम् सुजनता।<br>ङ) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते। | 1×5=5 |
| | 17. अधोलिखितयोः द्वयो श्लोकयोः अन्वयं उत्तर-पुस्तिकायां लिखत -<br>(क) गच्छन् पिपीलिको याति योजनानां शतान्यपि ।<br>अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ।।<br>अन्वयाः –<br>पिपीलकः अपि (i) ........... योजनानां शतानि (ii) ............। अगच्छन् वैनतेयः (iii).............. पदम् अपि (iv) ........... गच्छति ।<br>एकम् , न , गच्छन् , याति | ½×4=2 |
| | 18. रेखाङ्कितपदानां प्रसङ्गानुसारं उचितम् अर्थं प्रदत्तविकल्पेभ्यः चित्वा लिखत –<br>1. अविवेकः परमापदां पदम्।<br>(i) गृहम् (ii) आसनम् (iii) स्थानम् (iv) पादम्<br>2. स्वबाल- अपत्यस्य रक्षार्थं विप्रं व्यवस्थाप्य गता ।<br>(i) अपुत्रस्य (ii) भागिनेयस्य (iii) पत्युः (iv) सन्ततेः<br>3. क्षिप्रम् अक्रियमाणस्य तद् रसम् कालः पिबति ।<br>(i) अधुना (ii) सम्प्रति (iii) शीघ्रम् (iv) विक्षुब्धः | 1x4=4 |

| | | |
|---|---|---|
| | 4. नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्ट<br>(i) दूरं गच्छन् (ii) परः गच्छन् (iii) पुरतः गच्छन् (iv) समीपं गच्छन् | |
| | 19. अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथासूत्रं योजयत-<br>तरुच्छायायाम्, विस्मितः, भस्मसाद्, विष्ठाम्, महातपा, भिक्षाम्, प्रतीक्षस्व क्षणम्, क्रुद्धदृष्ट्या<br><br>एकदा 1 ............. नाम मुनिः 2 .................. उपविष्ट आसीत्। एका बलाका तस्योपरि 3. ............. उदसृजत्। सा बलाका मुनेः क्रोधदृष्ट्या 4........................ अभूत्। पुनः एकदा अयं मुनिः एकां गृहिणीं 5. ........................... अयाचत । पतिसेवारता सा अवदत् 6........................ । तदा मुनिः तां 7.......................... अपश्यत्। सा विहस्य अवदत्-नाहं बलाकेति। एतच्छ्रुत्वा मुनिः अतीव 8............... जातः। | 1/2x8=4 |

*****************************************************************************************

# केन्द्रीय विद्यालय संगठनम्

## आदर्श प्रश्नपत्रम्-1 अंकयोजना

कक्षा- (IX) कोड 119; विषयः- संस्कृतम्

समयः – होरात्रयम् पूर्णाङ्काः - 80

| | | |
|---|---|---|
| | ( खण्ड - क) अपठित अवबोधनम् - 10 | |
| 1. | (I) एक पदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(क) गणतंत्रदिवस-समारोहः<br>(ख) श्रावणपूर्णिमा<br>(ग) उत्सवौ<br>(II) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(क) अगस्तमासस्य पञ्चदशदिनाङ्के अस्माकं देशः स्वतंत्रः जातः।<br>(ख) अस्मिन् दिने विदुषां मेलनं, संस्कृतनाटकानां मञ्चनम् , परिचर्चा , श्लोकोच्चारणम् , संवादः , प्रदर्शनी , इत्यादयः बहवः कार्यक्रमाः आयोजिताः भवन्ति ।<br>(ग) संस्कृतदिवसे अस्माभिः संस्कृतकार्यक्रमेषु भागः ग्रहीतव्यः ।<br>(III) अनुच्छेदस्य उचितं शीर्षकं लिखत -<br>अध्यापकेन / अध्यापिकया स्वविवेकेन मूल्याङ्कनं करणीयम् ।<br>(IV) भाषिककार्यम् - (केवलं प्रश्नत्रयम्)<br>(क) (II) समग्रे (ख) (I) प्रतिष्ठे (ग) (I) विदुषाम् (घ) (III) राष्ट्रीयाः | 1x2=2<br><br><br><br><br>2x2=4<br><br><br><br><br>1x1=1<br><br>1x3=3 |
| | ( खण्ड – ख ) रचनात्मकंकार्यम् 15 | |
| 2. | स्व विद्यालयस्य वर्णनम् कुर्वन् मित्रं सञ्जीवं प्रति अधोलिखिते पत्रे रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत ।<br>(1) परीक्षाभवनम्<br>15.10.2021<br>प्रिय (2) सञ्जीव<br>(3) नमस्कारः । भवतः पत्रं प्राप्तम्। महान् सन्तोषः अभवत् । यथा भवता कथितम् तथा अहं पत्रोत्तरे स्व विद्यालयस्य वर्णनं (4) करोमि । मम (5) विद्यालयः अतीव विशालः सुन्दरः च अस्ति। अत्र त्रिसहस्रं छात्राः (6) मनोयोगेन पठन्ति। (7) पुस्तकालये पुस्तकानां पत्रपत्रिकाणां च सुव्यवस्था अस्ति। (8) क्रीडाक्षेत्रे वालीबाल-बैडमिन्टन्- क्रिकेट्-रज्जु आकर्षणादि खेलानां उत्तमः प्रबन्धः अस्ति । मातापित्रोः मम (9) प्रणामाः ।<br>भवतः (10) मित्रम् क ख ग | ½X10=5 |
| 3. | चित्रं दृष्ट्वा मञ्जूषापदसहायतया संस्कृते पञ्चवाक्यानि लिखत : –<br>अध्यापकेन / अध्यापिकया स्वविवेकेन मूल्याङ्कनं करणीयम् । | 1X5=5 |
| 4. | अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत-<br>1. नाम 2. दशम्यां 3. विद्यालयः 4. देहल्यां 5. कारणात्<br>6. मेलितुम् 7. कक्षायां 8. प्रभातः 9.जानासि 10. मित्रम् | ½×10=5 |
| | खण्ड-ग अनुप्रयुक्तव्याकरणम् - 25 अङ्काः | |
| 5. | निम्नलिखितप्रश्नानाम् उत्तराणि उचित विकल्पेभ्यः चित्वा लिखत -<br>क) (अ) त् ख)(इ) सिद्धिः ग) (ई) व् घ) (अ) च् | ½×4=2 |
| 6. | रेखांकितपदानां सन्धिं विच्छेदं वा कुरुत<br>क) महा+उत्साहः ख) सदा+एव ग) जगदीशः घ) इत्युक्तः | 1x4=4 |
| 7. | अधोलिखितानि वाक्यानि मञ्जूषातः उचित उपपदविभक्ति प्रयोगेण पूरयत<br>क) अ) जनकेन ख) अ) गृहम् ग) आ) विद्यालयं घ) अ) परिश्रमेण । | 1x4=4 |
| 8. | कोष्ठकप्रदत्तशब्दानाम् उचितैः शब्दरुपैः वाक्यानि पूरयत –<br>क) इ) बालकाः ख) आ) कवयः ग) अ) नदी घ) इ) फलानि | 1x4=4 |
| 9. | उपयुक्त धातुरुपैः वाक्यानि पूरयत – | 1x4=4 |

| | | |
|---|---|---|
| | क) अ) नमति , ख) अ) अस्ति ग) इ) अभवत् घ) आ) गमिष्यामि | |
| 10. | रेखांकितपदेषु प्रत्ययं प्रयुज्य विभज्य वा विकल्पेभ्य:चित्वा लिखत–<br>क) इ) पठितुम् , ख) अ) गम् + क्त्वा , ग) आ) प्रणम्य । | 1x3=3 |
| 11. | कोष्ठकप्रदत्त-समुचित-अव्ययपदेन अधोलिखित-वाक्यानि पूरयत -<br>क) अन्यत्र ख) सर्वत्र ग) यत्र-तत्र घ) तत्र | ½x4=2 |
| 12. | अधोलिखित-वाक्येषु समुचित-संस्कृतसख्यापदैः रिक्तस्थानानि पूरयत –<br>क) चत्वारः , ख) नव ग) चतुर्विंशतिः घ) द्वादश | ½x4=2 |
| | **खण्डः 'घ' पठित-अवबोधनम् 30 अङ्का:** | |
| 13. | अनुच्छेदं पठित्वा प्रश्नान् उत्तरत-<br>अ) एकपदेन उत्तरत -<br>क) नकुलं ख) विमृश्यकारिणं ग) सर्पश्च घ) रक्तेन<br>आ) पूर्णवाक्येन उत्तरत -<br>क) अविवेकः परमापदां पदम् \|<br>ख) नकुलः रक्त-विलिप्त-मुखपादः तस्य चरणयोः अलुठत् \|<br>इ) यथानिर्देशम् उत्तरत -<br>क) अलुठत् ख) रक्त-विलिप्त-मुखपाद: | ½x2=1<br><br><br><br><br>1x2=2<br><br>1x2=2 |
| 14. | अधोलिखितम् पद्यांशम् पठित्वा प्रश्नानामुत्तराणि उत्तरपुस्तिकायाम् लिखत- 5<br>(अ) एकपदेन उत्तरत-<br>(क) त्रीणि<br>(ख) पृथिव्यां<br>(आ) पूर्णवाक्येन उत्तरत-<br>(क) पृथिव्यां त्रीणि रत्नानि सन्ति \|<br>(ख) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते \|<br>(इ) भाषिककार्यम्-<br>(क) त्रीणि<br>(ख) मूढैः | <br>½×2=1<br><br><br><br>1×2=2<br><br><br>1×2=2 |
| 15. | अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानामुत्तराणि उत्तरपुस्तिकायाम् लिखत-<br>(अ) एकपदेन उत्तरत -<br>(क) लोकान्<br>(ख) सैनिक:<br>(आ) पूर्णवाक्येन उत्तरत<br>(क) आत्मघातिनः जनाः तु असूर्यान् लोकान् व्रजन्ति।<br>(ख) धैर्येण स्वतन्त्रतायाः उपायाः चिन्तनीयाः ।<br>(इ) भाषिककार्यम् -<br>(क) स्वरः<br>(ख) स्वतन्त्रतायाः | ½×2=1<br><br><br>1×2=2<br><br><br>1×2=2 |
| 16. | रेखाङ्कितानि पदानि आधृत्य प्रश्न निर्माणं कुरुत-<br>क) केन<br>ख) कया<br>ग) कः<br>घ) कस्य<br>ङ) कुत्र / केषु | 1×5=5 |
| 17. | अधोलिखितयोः द्वयो श्लोकयोः अन्वयं उत्तर-पुस्तिकायां लिखत -<br>(i) गच्छन् (ii) याति (iii) एकम् (iv) न | ½×4=2 |
| 18. | रेखाङ्कितपदानां प्रसङ्गानुसारं उचितम् अर्थं प्रदत्तविकल्पेभ्य: चित्वा लिखत- | 1x4=4 |

| | | |
|---|---|---|
| | **1. (iii) स्थानम्** **2. (iv) सन्ततेः** **3. (iii) शीघ्रम्** **4. (iv) समीपं गच्छन्** | |
| 19. | **अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथासूत्रं योजयत-**<br>**1. महातपा** **2. तरुच्छायायाम्** **3. विष्ठाम्** **4. भस्मसाद्**<br>**5. भिक्षाम्** **6. प्रतीक्षस्व क्षणम्** **7. क्रुद्धदृष्ट्या** **8. विस्मितः** | **1/2x8=4** |

*******************************************************************************************

# केन्द्रीय-विद्यालयः संगठनम्

## आदर्श प्रश्नपत्रम् - 2

**कक्षा- ( IX ) कोड 119; विषयः- संस्कृतम्**

**समयः – होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्य निर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति |
2. उत्तरलेखनात् पूर्वम् प्रश्नसंख्या अवश्यं लेखनीया |
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
4. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः |

| | ( खण्ड - क) अपठित अवबोधनम् - 10 | |
|---|---|---|
| 1. | प्रश्न -1 - अधोलिखित-अनुच्छेदं पठित्वा तदाधारित प्रश्नान् उत्तरत<br>हिमालयः भारतस्य उत्तरदिशायां स्थितः अस्ति। हिमालयः पर्वतराजः अस्ति । हिमालयस्य शिखराणि अति उन्नतानि सन्ति । एतानि शिखराणि सर्वं वर्षं हिमेन आच्छादितानि सन्ति। हिमालयात् अनेकाः नद्यः निस्सरन्ति यथा गंगा यमुना , विपाशा , इरावती वितस्ता आदयः । एतेषां नदीनां जलं भारतस्य भू-सिंचने महत् कार्यं कृत्वा उपाकरोति । अत एव भारत-भूमौ बहूनि अन्नानि फलानि च उत्पन्नानि भवन्ति। हिमालयः भारतस्य रक्षकः अस्ति । हिमालये विविधाः ओषधयः , वृक्षाः रत्नानि च भवन्ति । अतः भारतस्य शासनं हिमालयस्य रक्षायै तत्परम् अस्ति ।<br>क) एकेन पदेन उत्तरत<br>1. हिमालयः भारतस्य कस्यां दिशायां स्थितः अस्ति?<br>2. भारतस्य शासनं कस्य रक्षायै तत्परम् अस्ति ? | 1x2=2 |
| | ख) पूर्णवाक्येन<br>हिमालयात् काः काः नद्यः निस्सरन्ति?<br>हिमालये कानि कानि भवन्ति ? | 2x2=4 |
| | निर्देशानुसारम् उत्तरत-<br>1. 'कृत्वा 'अस्मिन् पदे कः प्रत्ययः:?<br>2. 'अतः भारतस्य शासनं हिमालयस्य रक्षायै तत्परम् अस्ति 'अस्मिन् वाक्ये अव्यय-पदं किम् अस्ति ?<br>3. 'महत् कार्यम्' अनयोः पदयोः विशेषण-पदं किम् ?<br>4. 'भक्षकः ' अस्य विलोमपदम् अत्र किम् प्रयुक्तम् ? | 1x3=3 |
| | घ) गद्यांशस्य उचितं शीर्षकं लिखत - 1×1=1 | 1x1=1 |
| | खण्ड "ख" रचनात्मक-लेखनम् 15 अंकाः | |
| 2. | चित्रं दृष्ट्वा मंजुषायाम् प्रदत्त- शब्दानां सहायतया पञ्च वाक्यानि संस्कृते लिखत<br><br>मञ्जूषा<br>क्रीडाक्षेत्रे, सन्ति, चत्वारः , वृक्षः , मेघाः , छात्राः , तिस्रः, चित्रे , वनं, खगाः , चित्रम् , विद्यालयस्य | 1X5=5 |
| 3. | मञ्जूषा-सहायतया संवादं पूरयत | 1X5=5 |

| | | |
|---|---|---|
| | राजीवः - सोम ! पश्य एतत् चित्रम् ।<br>सोमः - .......................................................................................................?<br>शोभा – एतत् तु अजन्ता-गुहानाम् चित्रं प्रतीयते ।<br>राजीवः - आम् ! ......................................................................................<br>सौरभः - अहो ! दृष्टम् । अत्र तु अनेकानि जातक-चित्राणि उट्टङ्कितानि सन्ति ।<br>देविका – जातकं किं भवति ?<br>राजीवः - अहं न जाने ! .............................................................................<br>(तत्र गत्वा)<br>छात्राः- ..................................................................................<br>आचार्यः - जातकम् अर्थात् जन्म । 'जातकमाला' इति नाम्नि पुस्तके भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति। एतासु परहिताय सर्वस्वं त्यक्तव्यम् इत्येव शिक्षितम् । एतादृशीम् एकां कथां कथयामि।<br>छात्राः – एवम् !<br>..........................................................................................<br>आचार्यः - श्रूयताम् तावत्। बौद्धाचार्यस्य आर्यशूरस्य जातकमालायाः शिविजातक-आधारिता एषा कथा।<br>मञ्जूषा –<br>गुरुवर ! जातकं किं भवति?<br>अतीव सुन्दरम् ।<br>महाराष्ट्रप्रदेशे स्थिताः एताः अजन्ता-गुहाः एव।<br>वयम् एतादृशीं कथाम् श्रोतुम् उत्सुकाः।<br>आचार्यं प्रक्ष्यामः। | |
| 4. | मञ्जूषा-सहाय्येन कथां पूरयत<br>(नासिकायामेव खड्गेन, दूरम्, मित्रता, मक्षिका, व्यजनेन, उपाविशत्, छिन्ना, सुप्तः, प्रियः)<br><br>पुरा एकस्य नृपस्य एकः 1) ..................... वानरः आसीत्। एकदा नृपः 2) .................... आसीत्। वानरः 3) .................. तम् अवीजयत्। तदैव एका 4) ...................... नृपस्य नासिकायाम् 5) ..................... । यद्यपि वानरः वारं-वारम् तां निवारयति स्म तथापि सा पुनः पुनः नृपस्य 6) ..................... उपविशति स्म। अन्ते सः मक्षिकां हन्तुं 7) ..................... प्रहारम् अकरोत्। मक्षिका तु उडडीय 8) .....................गता, किन्तु खड्गप्रहारेण नृपस्य नासिका 9) .................... अभवत्। अत एवोच्यते- ''मूर्खजनैः सह 10) ..................... नोचिता।'' | ½×10=5 |
| | **खण्ड- ग अनुप्रयुक्त-व्याकरणम् 25 अंकाः** | |
| 5. | अधोलिखितानाम् वर्णानाम् समुचितमुच्चारण-स्थानं कोष्ठकात् चित्वा लिखत<br>(1) क .................... (कंठः / तालुः )<br>(2) च .................... ( दन्तः / तालुः )<br>(3) व् .................... ( ओष्ठः/ दन्तोष्ठः)<br>(4) ञ् .................... '( नासिका/ कण्ठः) | ½×4=2 |
| 6. | सन्धिं विच्छेदं वा कुरुत - ( केवलं चत्वारि )<br>क) मम मातुलः ( सप्ताहान्ते) आगमिष्यति<br>ख) मुनि+ इन्द्रः वने तपः करोति।<br>ग) सूर्य + उदये तमः दूरी भवति<br>घ) वने ( सिंहोऽपि) वसति।<br>ङ) ( वाक् +ईशः) कुत्र पठति । | 1x4=4 |
| 7. | प्रदत्त विकल्पेभ्यः समुचितपदं चित्वा रिक्त-स्थानानि पूरयत -<br>1) .........................नमः। | 1x4=4 |

| | | | |
|---|---|---|---|
| | (क) गुरुम्। ख) गुरवः (ग) गुरवे। घ) गुरुः<br>2) सीता——--- सह वनं गतवती।<br>(क) रामेण। ख) रामम् (ग) रामस्य। घ) रामे<br>3) .........................कालिदासः श्रेष्ठः।<br>(क) कवयः। ख) कविषु (ग) कविभ्यः। घ) कवीन्<br>4) शिशुः......................... विभेति।<br>(क) बिडालात् ख) बिडालस्य (ग) बिडाले। घ) बिडालम् | |
| 8. | उचित शब्द रूपाणि चित्वा रिक्त स्थानानि पूरयत - (चत्वारि एव)<br>1.मयूरस्य ..................... अद्भुता: भवन्ति \|<br>(क) पिच्छ: (ख) पिच्छा: (ग) पिच्छम् (घ) पिच्छाम्<br>2. ..........................एकं रुप्यकम् यच्छामि \|<br>(क) आवम (ख) अहम् (ग) वयं (घ) त्वं<br>3. ................................ पितरम् नमसि ?<br>(क) अहं (ख) आवम (ग) त्वं (घ) यूयं<br>4. भीष्म: गंगाया: ........................ आसीत् \|<br>(क) पुत्र: (ख) पुत्रस्य (ग) पुत्रम् (घ) पुत्रकम्<br>5. प्रात: पूर्वदिशायाम् .................... उदेति \|<br>(क) रवि: (ख) रावो: (ग) रविये (घ) रावी: | 1x4=4 |
| 9. | प्रदत्तविकल्पेभ्य: उचित धातुरूपं चित्वा रिक्तस्थानानि पूरयत - (त्रीणी एव)<br>1. जना: देवं ....................\|<br>(क) नंस्यति (ख) नंस्यथ (ग) नंस्यन्ति (घ) नंस्याव:<br>2. सर्वे सुखिनो .................... \|<br>(क) भवतु (ख) भव (ग) भवन्तु (घ) भवानि<br>3. अस्माकम् देश: श्रेष्ठ: .................... \|<br>(क) अस्ति (ख) सान्ति (ग) सोंती (घ) स्तः<br>4. यूयं लेखं.......................<br>(क) लिखति (ख) लिखथ (ग) लिखन्ति (घ) लिखव: | 1x4=4 |
| 10. | बालिका: प्रकृतिप्रत्यय-विभागं कुरुत - ( केवलं त्रीणि)<br>क) रोदितुम् - = …………+……………<br>ख) दृश् + क्त्वा =- ………………………<br>ग) विलोक्य - = …………+……………<br>घ) निक्षिप्य -= …………+……………<br>ङ) आ+गम्+ल्यप् = …………………… | 1x3=3 |
| 11. | अव्यय पदैः रिक्त-स्थान पूर्तिःक्रियन्ताम् - ½×4=2<br>1- आकाशे मेघाः.........................गर्जन्ति।<br>2- सत्यं .........................जयते।<br>3- .........................कः समयः?<br>4- यत्र जलं .........................हंसाः ।<br>मञ्जूषा --- ( एव , तत्र, अधुना, उच्चैः) | ½x4=2 |
| 12. | अंकानां स्थाने संख्यां लिखत<br>1) 34 = ----------------<br>2) 22 =---------------<br>3) 50 =---------------<br>4) 16 = --------------- | ½x4=2 |

| | **खण्ड " घ"　　　　पठितावबोधनम्　　30 अंकाः** | |
|---|---|---|
| 13. | अधोलिखित-अनुच्छेदं पठित्वा तदाधारित प्रश्नान् उत्तरत-　5<br>अस्ति उज्जयिन्यां माधवः नाम विप्रः एकदा तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य स्नातुं गता \|<br>यदि सत्वरं न गच्छामि -ब्राह्मणः सहजदारिद्र्यात् अचिन्तयत् \|अथ ब्राह्मणः राज्ञा श्राद्धार्थं निमन्त्रितः \|<br>तर्हि अन्यःकश्चित् श्राद्धार्थं वृतः भवेत् - तःय \|<br>आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः \|<br>क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् \|\|<br>किन्तु बालस्य अत्र रक्षकः नास्ति चिरकालपालितम् इमं पुत्रनिर्विशेषं नकु ,भवतु ?तत् किं करोमि \|लं बालरक्षायां व्यवस्थाप्य गच्छामि \| तथा कृत्वा गतः \|<br><br>**I.** एकपदेन उत्तरं लिखत-　( प्रश्नद्वयं एव)<br>विप्रस्य नाम किम्?<br>ब्राह्मणः श्राद्धार्थं निमन्त्रितः ?<br>एकदा माधवस्य भार्या कुत्र गता ?<br><br>**II.** पूर्णवाक्येन उत्तरं लिखत-　2x1=2<br>(i) ब्राह्मणः सहजदारिद्र्यात् किम् अचिन्तयत्?<br>(ii) कालः कस्य रसं पिबति?<br>(iii)<br>**III.** यथानिर्देशम् उत्तरत-　2x1=2<br>1.'शीघ्रम्" अस्य पर्यायपदं किम्?<br>क) सत्वरं　(ख) श्राद्धार्थं　(ग) चिरकालपालितम्　(घ) इमं<br>2.'भक्षकः" अस्य विलोमपदं किम्? | ½x2=1<br><br>1x2=2<br><br>1x2=2 |
| 14. | श्लोकं पठित्वा उत्तराणि लिखत--　5<br>पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् \|<br>मूढैः पाषाणखण्डेषु रत्नसज्ञा विधीयते 1\|<br>शोको नाशयते धैर्यं \|शोको नाशयते श्रुतम् ,<br>शोको नाशयते सर्वं नास्ति शोकसमो ,रिपुः \|\|2\|\|<br><br>1. एकपदेन उत्तरत　(प्रश्नद्वयं एव )<br>1. कः नाशयते सर्वं ?<br>2. पृथिव्यां कति रत्नानि ?<br>3. तृतीयं रत्नम् किम् ?<br>2. पूर्णवाक्येन उत्तरं लिखत-<br>मूढैः किम् विधीयते ?<br>यथा निर्देशम् उत्तरत<br>1. "रत्नानि '' अस्य विशेषणपदं किं प्रयुक्तम् ? ...................................... ।<br>क) पृथिव्यां　ख) त्रीणि　ग) सुभाषितम्　घ) कोऽपि न )<br>2. " मूर्खैः" अस्य पर्यायपदं किम्?<br>क) श्रुतम्　ख) शोको् ,　ग) शोको न ,　घ) मूढैः | ½×2=1<br><br>1×2=2<br><br>1×2=2 |
| 15. | नाट्यांशं पठित्वा प्रश्नान् उत्तरत।<br>मेवाडाधिपतिः महाराणाप्रतापः अरण्ये कतिपयैः<br>विश्वासपात्रैः भटैः सह सङ्कटापनन्ने काले विचारमग्नः शिलायाम् उपविष्टः अस्ति । स्वदेशस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि । हन्त । वराकस्य पार्श्वे सेनायाः भोजनसामग्र्याः अपि च अभावः विद्यते। अधुना तु स स्वकीयैः प्राणैरेव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति ।) | |

| | | |
|---|---|---|
| | प्रतापः – "धिङ् माम् अधन्यम्, योऽहं मातृभूमिं रक्षितुम् असमर्थः । अलं मम एतेन जीवितेन । (दीर्घं निश्वसिति) ( यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः )<br>राजपुत्रः- (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम्।<br>प्रतापः –(समाश्वस्य) अयि भ्रातः । कथं जयघोषं कृत्वां मां लजयसे ?<br>राजपुत्रः– देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राच्यत्राणाय? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते नन भवान्।<br>प्रतापः –कुतस्तावद् विजयः ! स्वदेशमेव त्यक्तुं तत्परोऽहम्।<br>भटः –(अञ्जलिं बद्ध्वा) महाराज ! नैवं तावत् । स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः।<br>प्रतापः – एवं न वक्तव्यम्। कृतज्ञोऽस्मि भवताम् अहम्। वीरैः धीरैः बहु उपकृतं देशस्य । स्वदेशे एव तिष्ठद्भिः भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नः समाधेयः । सर्वे भटाः– देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्यामः।<br>प्रतापः– यथा रोचते भवद्भ्यः । प्रदेशोऽयम् अस्माभिः त्याज्यः एव । ( निस्सरति प्रतापः, भटाः चापि तमनुचरन्ति) ।<br><br>प्रश्नाः<br>। - एकपदेन उत्तरत ( द्वयमेव)<br>क) कृतज्ञोऽस्मि भवतां " इति कः कथयति?<br>ख) प्रतापः कुत्र विचारमग्नः तिष्ठति?<br>ग) भटाः केषां अनुगन्तारः सन्ति?<br><br>॥- पूर्णवाक्येन उत्तरत – 1×2=2<br>क) प्रतापः अन्ते किं कथयति?<br>ख) राजपुत्रः किं वदति?<br><br>॥।- भाषिकं कार्यम्– 1×2=2 ( द्वयमेव)<br>क) ' परतन्त्रतायै 'पदस्य नाट्यांशे विपरीतपदं किम्?<br>ख) "विजेष्यते नन भवान्" ।"भवान् " इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>ग) ' वीक्ष्य" इत्यर्थे अत्र किं पदं प्रयुक्तम् | ½×2=1<br><br>1×2=2<br><br>1×2=2 |
| 16. | रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरूत- 1x5=5<br>(क) माधवः (उज्जयिन्याम्) अवसत् \|<br>(ख) (नकुलस्य) मुखं पादाः च रक्तेन विलिप्ताः<br>(ग) ब्राह्मणः (दारिद्र्यात्) अचिन्तयत् \|<br>(घ) (वैनतेयः) अगच्छन् एकं पदं न गच्छति \|<br>(ङ) (ऐश्वर्यस्य) विभूषणं सुजनता \| | 1×5=5 |
| 17. | अधोलिखितम् अन्वयं पूरयत -<br><br>भवन्ति नम्रास्तरवः फलोद्गमैः<br>नवाम्बुभिर्भूरिविलम्बिनो घनाः \|<br>अनुद्धताः सत्पुरुषाः समृद्धिभिः<br>स्वभाव एवैष परोपकारिणाम् \|\| 7 \|\|<br><br>अन्वयः = तरवः.................... नम्राः भवन्ति। …………..नवाम्बुभिः भूरिविलम्बिनः भवन्ति। सत्पुरुषाः…………..अनुद्धताः भवन्ति। परोपकारिणां एष एव ………….. भवति।<br>( समृद्धिभिः, स्वभावः , घनाः , फलोद्गमैः ) | ½×4=2 |
| 18. | रेखाङ्कितपदानांप्रसङ्गानुकुलं अर्थं चिनुत।<br>1- घनाः ( भूरि) विलम्बिनः भवन्ति ।<br>क) वारि ख) मेघाः ग) भूताः घ) बहु<br>2- (भटाः ) प्राणैरेव देशं स्वतन्त्रं कर्तुमिच्छन्ति।<br>क) सैनिकाः ख) घटाः ग) भर्ता घ) भ्रमराः<br>3- आलस्यं शरीरस्थः महान् ( रिपुः) अस्ति। | 1x4=4 |

| | | |
|---|---|---|
| | क) आखुः ख) ऋतुः ग) शत्रुः घ) सेतुः<br>4 - कवयामि ( वयामि) यामि।<br>क) वस्त्रवयनं करोमि ख) बीजं वपामि ग) बध्नामि घ) बेधनं करोमि। | |
| 19. | **मञ्जूषा-सहाय्येन कथां। पूरयत**<br>**[ तरुच्छायायाम्, मुनिः, भस्मसाद् अभूत्, महातपा नाम, मुनेः, भिक्षाम्, प्रतीक्षस्वक्षणम्, विस्मितः, नाहं बलाकेति, क्रुद्धदृष्ट्या]**<br><br>**कथा एकदा1) ………………मुनिः 2)…………..…उपविष्ट आसीत् । एका बलाका तस्योपरि विष्ठां उदसृजत्। सः तां कोपेन अपश्यत् । दृष्टमात्रा एव सा बलाका 3) …………..…। 4)…….………।पुनः एकदा. असौ 5) …………….…… एकां गृहिणीं 6)……………… अयाचत । पतिसेवारता सा अवदत् 7)…..……………। तदा मुनिः तां 8)……………..… अपश्यत्। सा विहस्य अवदत् 9) …...…………। एतच्छुत्वा मुनिः अतीव 10) ……………जातः।** | **1/2x8=4** |

**********************************************************************************************